

अक्टूबर तः दिसम्बर २०२२ पर्यन्तम्
आश्विन-शुक्ल-षष्ठी तः पौष-शुक्ल-नवमी पर्यन्तम्
(वै-२०७९)

RNI
DELSAN/2013/50379

ISSN:2347-1565

# संस्कृत-चन्द्रिका

## मासिकी संस्कृत-बालपत्रिका

वर्षम्-१० संयुक्ताङ्कः-३-५

सम्पादकः
डॉ. अरुण कुमार झा
सचिवः

एक साहित्यिक त्रैमासिक पत्रिका

एवं

समकालीन साहित्य के रचनात्मक मूल्यांकन की जीवन्त प्रस्तुति

तथा

सम्पूर्ण देश के प्रसिद्ध साहित्य-साधकों के साथ-साथ नवोदित प्रतिभाओं की सशक्त लेखनी की संयुक्त प्रस्तुति

# "संस्कृत मञ्जरी"

(आई.एस.एस.एन-2278-8360)

संस्कृत भाषा और साहित्य के प्रचार-प्रसार हेतु सतत प्रयत्नशील दिल्ली संस्कृत अकादमी, दिल्ली सरकार द्वारा प्रकाशित एक ऐसी सम्पूर्ण साहित्यिक पत्रिका जो सहज मानवीय संवदेनाओं, शोध-निबन्धों तथा उदात्त जीवन-मूल्यों का अनूठा संगम और प्रत्येक वर्ग के पाठक-समुदाय की अपेक्षा के अनुकूल पठनीय एवं संग्रहणीय है।

मूल्यः- एक प्रति रु. 25/- मात्र, वार्षिक सदस्यता शुल्क रु.100/- मात्र

सुरुचि सम्पन्न स्वस्थ सकारात्मक अभिव्यक्ति की संवाहिका

# "संस्कृत मञ्जरी"

के स्थायी अध्येता बनें।

आज ही अपना वार्षिक सदस्यता शुक्ल नगद, मनिआर्डर अथवा दिल्ली में भुनाये जाने योग्य बैंक ड्राफ्ट दिल्ली संस्कृत अकादमी के नाम से भिजवाकर सदस्यता प्राप्त करें। शुल्क मल्टी सिटी चैक द्वारा भी स्वीकार्य होगा।

पत्र व्यवहार का पता --

सचिव/ सम्पादक, दिल्ली संस्कृत अकादमी, दिल्ली सरकार

प्लाट सं.-५ झण्डेवालान, करोलबाग, नई दिल्ली-११०००५

दूरभाष सं.- ०११-२३६३५५९२, २०९२०३६३

ISSN-2347-1565

मूल्यम्- २५ रूप्यकाणि

# संस्कृत-चन्द्रिका

## ‘मासिकी संस्कृत-बाल-पत्रिका’

अक्टूबर तः दिसम्बर २०२२ पर्यन्तम्

वर्षम्-१०-संयुक्ताङ्कः-३-५

(वै०-२०७९)
(आश्विन-शुक्ल-षष्ठी तः पौष-शुक्ल-नवमी पर्यन्तम्)

सम्पादकः
डॉ. अरुणकुमार झा
सचिवः

सहायकसम्पादकः
प्रद्युम्नचन्द्रः

सम्पादक सहायकः
मनोज कुमारः

आवरण/सज्जा
श्रीमती पूजा गड़ाकोटी


| क्र.सं. | अनुक्रमणिका | | पृष्ठ-संख्या |
|---|---|---|---|
| १. | सम्पादकीयम् | | III |
| २. | श्यामलसन्ध्या | डॉ. देवीसहाय पाण्डेय ‘‘दीप’’ | १ |
| ३. | चित्रपतङ्गी | डॉ. नवलता | २ |
| ४. | नैतिकता यदि त्वयि | प्रो. डॉ. सुदेश गौतम | ४ |
| ५. | निःस्वार्थकामना | डॉ. सुरेन्द्र कुमार शर्मा | ६ |
| ६. | रक्षणीयाः एते उपकारकाः वृक्षा | श्रीमत्यः पूनम कुन्डू | ९ |
| ७. | श्रेष्ठः कलाकारः | म. वि. कोल्हट्करः | १० |
| ८. | असहयोगिनी पत्नी | डॉ. शिवप्रसाद त्रिपाठी | १२ |
| ९. | पञ्चभूतकल्पना | डॉ. के.वी.मेनन | १४ |
| १०. | मनुर्भवः | श्री शुकदेव शर्मा | १७ |
| ११. | किंनिर्णयः क्रोधवशं गतस्य | ओम् प्रकाश ठाकुरः | २० |
| १२. | यथार्था दीपावलिः | डॉ. शारदा रमेश गाडगे | २३ |
| १३. | भगवद्-भक्तः | डॉ. केशव राम शर्मा | २७ |
| १४. | क्रीड़ाया महत्त्वम् | श्री मनोज कुमारः | ३१ |
| १५. | व्यावहारिक-संस्कृतम् | श्री मनोज कुमारः | ३३ |


दिल्ली संस्कृत अकादमी
(राष्ट्रिय राजधानी क्षेत्रम्, दिल्लीसर्वकारः)
DELHI SANSKRIT ACADEMY
(Govt. of N.C.T. , Delhi)
ई-पत्रिका

## प्रकाशकः

सचिवः

दिल्ली-संस्कृत-अकादमी, दिल्ली-सर्वकारः

प्लॉट सं०-५, झण्डेवालानम्, करोलबागोपनगरम्, नवदेहली-110005

दूरभाषः - 011-23635592, 20920363

## सदस्यताशुल्कम्

प्रति-अङ्कम् : 25 रूप्यकाणि

वार्षिकम् : 250 रूप्यकाणि

ISSN : 2347-1565

©दिल्ली-संस्कृत-अकादमी, दिल्ली-सर्वकारः

©Delhi Sanskrit Academy, Govt. of N.C.T of Delhi

शुल्कप्रदानप्रकारः

बैंकधनादेशः (डी०डी०), डाकधनादेशः (मनिआर्डर) अथवा सी०टी०सी० चैक माध्यमेन (दिल्लीसंस्कृतअकादमीपक्षे)

Mode of payment:
Demand Draft, Money order or by CTC Cheque
( In favour of Delhi Sanskrit Academy)

E-mail Id : sanskritpatrika.dsa@gmail.com
sanskritprakashan.dsa@gmail.com
Website : https://sanskritacademy.delhi.gov.in

# सम्पादकीयम्

**अयि सुरवाणीसमुपासकाः सहृदयाः!**

संस्कृतम् सदाचारपूर्वकं जीवनयापनस्य कलां प्रबोधयति। केवलं संस्कृतमेव विश्वस्य एतादृशी भाषा अस्ति या विश्वस्य प्राचीनतमानामपि भाषाणां जननी अस्ति। साम्प्रतं विज्ञानेनापि प्रमााणितं यद् एषा सर्वाधिका वैज्ञानिकी भाषास्ति। यावद् शुद्धं व्याकरणं संस्कृतस्य वर्तते तावन्न कस्याश्चन अन्यस्याः भाषायाः। यथा–

**युधिष्ठिरस्य या कन्या नकुलेन विवाहिता**
**पूजिता सहदेवेन सा कन्या वरदा भवेत्॥**

यदि भारतीयसंस्कृते ज्ञानमिष्यते तदा अवश्यमेव संस्कृतभाषा ज्ञातव्या। संस्कृतस्य प्रतिस्पर्धायां नान्यत् किमति साहित्यं वर्तते। अतः व्याकरण, साहित्यादि ग्रन्थेषु निहित ज्ञान–गवेषणं कृत्वा एवं च प्रकाशनाय प्रेषयन्तु।

भावत्कः
**डॉ. अरुणकुमारझा**
सचिवः

# श्यामलसन्ध्या

-डॉ. देवीसहाय पाण्डेयः ''दीप''



रविः लुप्यते सन्ध्याकाले
तमः दृश्यते सन्ध्याकाले ।
गते च सूर्ये नभः प्राङ्गणे
शशिः दीप्यते सन्ध्याकाले ॥

गुप्ततारकः सन्ध्याकाले
तस्मिन् गगनाङ्गणे विशाले।
दीव्यति कस्तूरिकातिलकमिव
सन्ध्यारमण्याः कलभाले ॥



याश्चरन्ति च बने विशाले
ताश्च धेनवः सन्ध्याकाले।
आगच्छन्ति च गोष्ठे त्वरितं
वत्सान् हर्षयन्ति तत्काले ॥

सन्ध्या रजनीमुखं कथ्यते
कुमुदं तां विलोक्य हृष्यते ।
एकं वस्तु हि भावो भिन्नः
कमलं तां विलोक्य खिद्यते ॥



# चित्रपतङ्गी

-डॉ. नवलता

कुङ्मे कुङ्मे विहर स्वैरं
पुनरेहि च मे गेहम्।
त्वया सहैवेड्यितुमम्बरे
भोः मुग्धेऽभिलषेऽहम् ॥

केन चित्रकारेण निर्मिता
भव्या तनुस्त्वीया?
नानावर्णैश्चित्रबिन्दुभि-
र्भाति मनोरमणीया॥

पुष्पपल्लवे यदा निषण्णा-
मनुधावामि सलीलम् ॥
पलायसे त्वं झटिति चञ्चले
जानेऽहं तव शीलम् ॥



वने-वने गायन्ती मन्दं
नृत्यन्ती विहरन्ती।
दूरेऽतीव दृश्यतेऽनुपलं
तरुपत्रेषु लसन्ती ॥

सुन्दरि सुन्दरसुमः सङ्कुले-
ऽतिथिर्भवसि यन्नित्यम् ।
सदयं स्वीकरोषि रसचषकं
समर्द्धयसि लालित्यम् ॥

चित्रपतङ्गि त्वं प्रबोधयसि
लोकममुमिदं रुचिरम् ।
समस्वभावगुणेषु सर्वदा
फलति सौहृदं सुचिरम् ॥

-के-६८०, आशियाना कॉलोनी,
कानपुर रोड़, लखनऊ (उ० प्र०)

# नैतिकता यदि त्वयि

-प्रो. डॉ. सुदेश गौतम

दुर्लभं नहि किञ्चिद् हि लोके मर्त्ये तथापरे।
कर्मेष्ठा, च श्रमेनिष्ठा, नैतिकता यदि त्वयि ॥१॥

सर्वेषां जीवनं मित्र! सर्वेषां मरणं तथा ।
तदैव जीवनं 'भव्यं' नैतिकता यदि त्वयि ॥ २ ॥

किञ्चिद् ''न्यूनं'' वरं लोके, मानवो यदि मानवः
न दुष्टता कदा ग्राह्या नैतकिता यदि त्वयि ॥ ३ ॥



कुरु वृत्त्यनुरूपं कार्यं, यथाहि तव वेतनम् ।
कर्मचौर्यं महापापं नैतकिता यदि त्वयि ॥४॥

गुरूपूजां विना विद्या, फलति न धरातले ।
पितरौ वन्दनीयौ, च नैतकिता यदि त्वयि ॥५॥

पुष्पवृष्टिः सदालोके, मंगलं मंगलं सदा यदि
सुधन्य जीवनं मित्र! नैतकिता यदि त्वयि ॥ ६ ॥

गृहं ग्रामं तथा विश्वं सर्वं यच्च धरातले ।
रक्षा तेषां नु ते कार्यं, नैतकिता यदि त्वयि ॥ ७ ॥

चित्वाग्रन्थेऽपि, विज्ञाय, काले वर्तेत् महाजनः ।
प्रज्ञास्ति तव पार्श्वे नु, नैतकिता यदि त्वयि ॥ ८॥

असत्यभाषणं, मौनं वा काले कथनं तथा ।
कर्तव्यं न च कर्तव्यं नैतकिता यदि त्वयि ॥९॥

किं हि प्रसारितं किञ्च, घृतं तेन मनोस्थले ।
सदा संतुलनं पापं नैतकिता यदि त्वयि ॥१० ॥

वृद्धाः,बालाः,तथा नार्यः, याने मार्गे गृहे तथा ।
मान्याः सम्माननीयश्च नैतकिता यदि त्वयि ॥११ ॥

सुसेव्याः निर्धनाः, न्यूनाः, पशवः, मानवाः तथा ।
राष्ट्रं सर्वोपरिस्थञ्च नैतकिता यदि त्वयि ॥१२ ॥

त्वया स्वजीवने यत्प्राप्ता सकला प्रकृतेः निधिः।
दशांशं प्रददस्व त्वं नैतकिता यदि त्वयि ॥१३॥

कृते नैतिकमूल्यानां पाठनीयं हि संस्कृतम्।
नह्यन्या तादृशी शिक्षा नैतकिता यदि त्वयि ॥१४॥

विद्यापरा त्वया प्राप्ता सम्प्राप्ता च परा त्वया
नैतिकतां विना गौतम व्यर्थं तव जीवनम् ॥ १५ ॥

राजधान्या यदा यात्रा मासे तु फाल्गुणे शुभे।
गौतमस्य मनोयात्रा सञ्जाता कविता प्रिये॥ १६॥

द्वादशे दिवसे रात्रौ चैकादश हि वादने ।
मार्चमासे शुभे पुण्ये-पूर्णागौतम संसृति ॥१७॥



-प्राचार्य, हि.आ. सं. महा. जांगला
शिमला हि. प्र.

# निःस्वार्थकामना

-डॉ. सुरेन्द्र कुमार शर्मा

एकदा सम्पूर्णं वर्षं व्यतिगतं किन्तु वृष्टिर्न बभूव। वृष्ट्याभावे पशुपक्षिणां मनुष्याणां च जीवनं दुर्वहं जातम्। चतुष्पदां मरणं प्रारब्धम्। अकालस्य भीषणं प्रतिच्छायं दृष्ट्वा भीताः प्राणिन एकस्थानाद् अपरं स्थानं प्रयाताः। अनेके ग्रामा रिक्तप्रायाः सञ्जाताः। रामलालः स्वात्मजेन गोविन्देन ग्रामान्निर्यातुंसज्ज आसीत्। यदा सः प्रतस्थे, तस्याः पत्नी जानकी अपि तमन्वचलत्। रामलालस्य परिवारः कष्टातिशयस्य भाजनमासीत्।

मार्गे भयावहं मरूस्थलं वर्तते स्म। सर्वत्र रेणुमयमेव भूतलमवर्तत। शून्यञ्च वातावरणम्। ते सर्वे निराबाधं पुरो गम्यमाना आसन्। सहसा प्रबलावात्या प्रारब्धा। चक्षुः शक्ति क्षणितां गता। परितस्तमोऽत्य-यमासीत्। किमपि न दृश्यते स्म। कुटिलकालस्य दुष्प्रभावात् गोविन्दः पित्रोः पृथग्भूतः। यदा वात्या प्रशान्ता, तदा सः मातः मातः पितः पितः इत्युच्चैराकारयितुं लग्नः।

अरण्ये तस्य शब्दा प्रतिध्वनितास्तुष्णीं भजन्ते स्म। किमपि प्रत्युत्तरं स न लब्धवान्। अन्ततः एकस्मिन्नुन्नतस्थले स्थित्वा स भृशम् अरोदीत्। यदा रुदनेन श्रान्तस्तदा पित्रोरन्वेषणाय चलितुमारब्धः। तीव्रगत्या प्रचलन् एवासौ कस्यचिद् गिरेरूपत्यकायाः पार्श्वमगच्छत्। तत्र परितः शस्यश्यामलाया भूमेरतितरा हरितिमा विलसति स्म। एकः जलप्रपातोऽप्यासीत्। गोविन्दः करयुगलपुटेन प्रपाते जलमपिबत्। सः श्रान्तिमपनेतुं तत्रैव एकस्य वृक्षस्य प्रच्छायशीतले तले शयनं कृतवान्। क्षणानन्तरमेव च निद्रातिशये निमग्नः। यदा तस्य निद्रा व्यतीता, तदीये नेत्रे उन्मीलिते जाते। स क्षुधात्ययमन्वभवत्। इतस्ततो दृष्ट्वा पुनश्चलितुम् आरभत्। एको बदरीद्रुमस्तदृष्टि पथे समागतः। तस्मिन् द्रुमे बहूनि पक्कानि बदरीफलान्यासन्। द्रुममारूह्य यदा तस्य शाखा अकम्पयत्स्, तानि बदरीफलानि वृन्तच्छिन्ननि भूमौ पतितानि। वृक्षादवतीर्य स बदरीफलान्यभुङक्तु। कतिपयानि फलानि स उत्तरीये बद्धवा पुनर्गन्तुकामस्ततोऽग्रेप्राचलत्।

पित्रोः स्मरणं मध्ये मध्ये जायते स्म। किञ्चित्पदानन्तरमेव एका शुष्कसरित् दृष्टा। स चिन्तितवान् यदयमकालस्यैव प्रभावोऽस्ति, सर्वत्र शुष्का एव वर्तन्ते जलाशयाः। स रेणुमार्गे गमनं कष्टकरं मत्वा शुष्कसरिताऽन्तर्मार्गाद् गन्तु प्रववृते। सहसा काचिद् गुहा तस्य दृक्पथे समागता। स गुहामुखात् त्राहि मां त्राहि मां इति ध्वनिमश्रौषीत् ।





यद्यपि गुहान्तर्गहनं तम आसीत्तथापि गोविन्दो नाबिभ्यत्। स गुहामुखं प्रविवेश पुनः स एव ध्वनि श्रुयमाण आसीत्। अपरिचिते वन्यभागेऽत्र गुहायां को भवितुं शक्यत इति विचार्यमाणो विविध शङ्काशङ्कितश्च गोविन्दः क्षणं स्तब्धः। पुनर्ध्वनिरूद्गतः –त्राहि, कृपालुः कश्चिन्मां त्राहि। गोविन्दो गुहान्तर्गतवान्। स आत्मनः कुलदेवतां प्रार्थयमाणो वदति स्त–हे भगवान्! कुरुष्व मम साहाय्यम् । गुहाभार्गो दक्षिणस्यां क्रान्तः। सोऽपि तं प्रत्येव चलितुं प्रचक्रे। क्षणानन्तरं प्रकाशो दृष्टः। स उपरि व्यालोकयत्। केनचिदायतच्छिद्रेण प्रकाशः समायाति स्म। गुहेयं गृहभिवावर्तत। तत्र भोजनपानादेः समग्रा सामग्री आसीत्। एतत्सर्वं गोविन्दस्य कृते महदाश्चर्यकरं जातम्। किञ्चिदग्रे प्रयाते ते दृष्टं यद्विशालेनफणिन कश्चिज्जनः पाशीकृतः। स जनो भृशं रोरुद्यमाण आसीत्। यदा स गोविन्दमपश्यत् तदाऽब्रवीत्– भ्रातः! मां रक्ष, रक्षमाम्।

फणिरूवाच– अहं त्वां कदापि न मोक्ष्ये, त्वं पापो दुष्टश्चासि। गोविन्दो बुद्धिमान् आसीत्, सः फणिमवदत्–फणिदेव! कस्यचित्पापस्य हननमपि पाप एव। कुतो भवान् पुनरत्र व्यर्थ परिश्रम्यसि। फणिरूदतरत्–योऽपराध्यति तस्मै दण्डप्रदानमेव न्यायः। अयं दुष्टः फणिनां व्यवसायं करोति स्म। वन्यभागादनेकान् फणीन् निगृह्य अयं तान् विक्रीतवान्। अद्यायं मां निगृहीतुं आगतवान् किन्तु सम्प्रति मया निगृहीतः।

फणिन उत्तरं श्रुत्वा गोविन्दस्य मनसो भयं निर्गतम्। निर्भयो भूत्वा स फणिनमुपगम्य प्रोवाच–अहं जानामि यत् व्यर्थमेव पशुपक्षिणां हन्ता पापभाग्भवति तथापि इदमसत्यं नास्ति यद् भूमौ अनेके प्राणिनो मनुष्याश्च इतर प्राणिमाध्यमेन स्वीयामुदरपूर्त्तिं कुर्वन्ति।

फणिरवोचत्–तथाप्यहमेनं भुङ्क्तवा स्वीयांक्षुधामपाकरोमि। त्वां न कोऽपिविराध्यति किन्तु अहमेनमवश्यमेव रक्षामि–गोविन्दस्य उत्तरमासीत्।



गोविन्दः कुलदेवतां स्मृत्वा फणिपुच्छं गृहीत्वा पाशीकृतं जनं रक्षितुं प्रावर्तत। सहसा चमत्कारः सञ्जातः। एको धूमपुञ्जस्तत उद्गतः। यदा धूमो निर्वापं गतस्तदा यक्षयुगलं तत्रवास्थितमासीत्। भयमिश्रिताश्चर्येण गोविन्दो यक्षौ निर्निमेषं द्रष्टुमारभत्।

तयोरेकः अब्रवीत्- भ्रातः! आवां यक्षौ। इन्द्रेणशप्तौ भूत्वा पृथिव्यामुषितवन्तौ। पूर्वं शापप्रदानकाले यदा स्वाम्यनुग्रहं कामयमानौ आवां निवेदनम् अकुर्वः। तदा तेनोक्तम् आसीत् यत् यदा कश्चित सत्यवादी युवयोः स्पर्शं विद्यास्यसि, तदा मुक्तौ भविष्यथः। सम्प्रति त्वत्स्पृष्टौ आवां शापमुक्तौ जातौ। ब्ररूहि त्वं किं कामयसे?

गोविन्दः हस्तौ समानीय उवाच-महाशयौ! अहं सम्यगनुभूतोऽस्मि यत् सत्यवचने प्रबला शक्तिर्भवति,तथापि अधुनात्वहं स्वपितरौ द्रष्टुं वाञ्छामि। पुनश्चेदमपि वाञ्छामि यन्मद्देशः कदाप्यकाल-ग्रस्तो न भवेत्।

यक्षौ ऊचतुः- गोविन्द! त्वं धन्योऽसि यत् त्वया निःस्वार्थकामना कृता। तव पितरौ तु अकालस्यावसाने समायास्यातः। किन्त्वेतत्पूर्वं त्वया स्वदेशे गत्वा तत्रत्यं भूपतिं निवेद्य भूकर्षणं कार्यम्। एतानि अस्मद्दत्तानि बीजानि ततो उप्तव्यानि। द्वित्रिदिवसान्तरात्न एव प्रचुरा वृष्टिर्भविष्यति। अकालश्च समाप्स्यते। सहसा यक्षौ अन्तर्हितौ। गोविन्दश्च स्वदेशं प्रतियातुं मतिं चक्रे । स ग्रामं गत्वा ततश्च तद्राज्यस्य भूपतिमुपगम्य यक्ष कथितं सर्वं वृत्तं निवेदितवान्। गोविन्दस्य कथनं सत्यं मत्वा नृपः तद्वद् आचारणे लग्नः। कृष्कैः भूकर्षणं सम्पादितम्। यक्ष दत्तानि दिव्यबीजानि उप्तानि। यथाकालं प्रचुरा वृष्टिः सञ्जाता। क्षेत्रेषु शस्यानि समृद्धानि। लोकाः सुखिनो बभूवुः। गोविन्दस्य पितरावपि मासान्तराल एव तत्राऽऽगच्छताम्। तौ गोविन्दं दृष्टवा भृशं प्रहृष्टौ आस्ताम्।

**-२३ जैन कालोनी**
**गोल्यावासः मानसरोवर**
**जयपुरम् -३०२०२०**

# रक्षणीयाः एते उपकारकाः वृक्षाः

वृक्षाः अस्माकं जीवनस्य आधाराः सन्ति। एते भूमेः उद्भवन्ति। एतेषां मूलानि पृथिव्यां दूरं दूरं ततानि भवन्ति। मूलानाम् उपरिष्टात् वृक्षस्य प्रकाण्डः भवति। प्रकाण्डात् शाखाः उद्भवन्ति। शाखाभ्यः प्रशाखाः सम्भवन्ति। एतासु प्रशाखासु एव पत्राणि पुष्पाणि फलानि च भवन्ति।

वृक्षाः अपि अस्माकम् इव भुक्त्वा पीत्वा च जीवन्ति। मूलानि वृक्षाणां पादाः भवन्ति। एते पादैः पिबन्ति अतएव पादपाः कथ्यन्ते। मूलानि भूमेः रसं गृहीत्वा अन्येभ्यः अवयवेभ्यः यच्छन्ति। येन एते वृक्षाः फलन्ति। वृक्षाः अपि मनुष्याः इव सुखानि दुःखानि च अनुभवन्ति। एतेषु अपि प्राणाः भवन्ति, अतएव एते प्राणिनः इव जायन्ते वर्धन्ते म्रियन्ते च। परन्तु एते अचराः सन्ति। अर्थात् एते खग-मृग-जलचर-नराः इव न चरन्ति।

वृक्षाणां बहवः भेदाः सन्ति। एतेषु केचित् फलवृक्षाः एन्ति अन्ये च पुष्पवृक्षाः भवन्ति। वृक्षाः पर्यावरणं सन्तुलितं कुर्वन्ति। एते वर्षायै अपि सहायकाः भवन्ति। एते वातावरणं स्वच्छं कुर्वन्ति। वृक्षाः पर्यावरणे प्रसृतान् प्रदूषितवायून् गृहीत्वा श्वसनक्रियायै अस्मभ्यं प्राणवायुं यच्छन्ति।

वृक्षाः पत्रैः पुष्पैः फलैः छायया वल्कलैः काष्ठैः च सदैव प्राणिनाम् उपकारं कुर्वन्ति, अतः उपकारकाः एव एते वृक्षाः। एतैः विना अस्माकं जीवनम् असम्भवम् अस्ति। एतेषां रक्षणे एव अस्माकं जीवनस्य रक्षणम्। अतएव कथ्यते-

**दशकूपसमा वापी दशवापीसमो ह्रदः।**
**दशह्रदसमः पुत्रो दशपुत्रसमो द्रुमः॥**

एका वापी दशकूपैः समा भवति। एकः ह्रदः दशवापीभिः समः भवति। एकः पुत्रः - ह्रदैः समः भवति। किन्तु एकः वृक्षः तादृशैः दशपुत्रैः समः भवति।



-३२ ई, पुलिस
कालोनी मॉडल टाउन-॥
देहली-११००९

# श्रेष्ठः कलाकारः

–म.वि.कोल्हट्कर:

सम्राट आसीत चार्ल्समहोदयः। एषः सम्राट् पराक्रमी, सत्यप्रियः उदारः आसीत्। कलाकाराणां तथा पण्डितानां सः नित्यं समादर करोति स्म।

एकदा अस्य सम्राटस्य सभायां द्वौ कलाकारौ आगतौ। एकः कलाकारः ग्रीसदेशतः आगतः, द्वितीयः कलाकार चीन देशतः आगतः, चार्ल्स महोदयः, तयो कलाविषयोः विषये विचारणम् अकरोत्, ग्रीसकलाकारः अवदत् अहं चित्रकारः अस्मि। भित्तिचित्रं मम विशेषः। अहं भित्तो विस्तृतं नितांतसन्दुर चित्रं आरेखयामि।

सम्राट अवदत् भवतः कलायाः आविष्कारम् अहं द्रष्टुम इच्छामि।

वग्य् अवदत् सम्राट ग्रीसकलाकारम् एकां भित्तिं दर्शितवान् उक्तवान् च ' अस्या भित्तौ भवतः कलायाः दर्शनं कारयतु। भवतः रेखाटनार्थं या या सामग्री आवश्यकी सा सा साम्रगी उपलब्धा भवेत् ।

एवं भित्तिः कलावगराय दीयते। रंगचूर्णानि तथा अन्यानि साधनानि यानि यानि याचितानि तानि तानि यथास्थितं दीयन्ते।

एकं सप्ताहं यावत कलाकारः दिनरात्रं परिश्रमम् अकरोत्। स्वीयम् अखिलं कौशल्सयं आयोजितवान् परिपूर्णं विस्तृतं चित्रं भित्तौ अवतीर्ण–यथा विश्वामित्रस्य प्रतिसृष्टिः।

चित्रस्य उपरि जवनिका स्थापिता। सम्राट निवेदितः यत् चित्रं पूर्णं कृतम्। यथाशक्यं शीघ्रं चित्रस्य अवलोकनं करोतु।

पश्चात् चीनदेशीयः कलाकारं पृष्ठः किम् अस्ति तस्य कलाविषयः चीनकलाकारः अवदत् मम कलाविषयः अस्ति भित्तेः नितांत स्वच्छीकरणम्।

पुरतः स्थितः भितिः चीन कालाकारस्य स्वाधीना कृता।

दीर्घकालं यावत् एषः कलाकरः परिश्रमं कृतवान्। भित्तिः स्वच्छतया दर्पणसमां कृता।

एषा कलाकृतिः अपि जवनिकायाः पार्श्वे स्थापिता। सम्राट निवेदितः यत् कलाकृतिः परिपूर्णा भूता।

सम्राट आदौ प्रथमकृतितः जवनिकां दूरीकृतवान्। विस्तृतं रंगचूर्णयुक्तम् चित्रं विधातुः निर्मितिः इव भासिता।



अहो आश्चर्यम्। विलक्षणम्। एषा तु परिसीमा एव कलाकौशल्यस्य! चकित चकितः सम्राट अवदीत्।

पश्चात् द्वितीयाभित्तितः जवनिका अपसाकिता। एषा कलाकृतिः चीनकलाकारस्य। एतेन कलाकरोण आदिन रात्रिं परिश्रमं कृत्वा एषा भित्तिः इयती इमंली स्वच्छा कृता आसीत् यथा दर्पणः एव।

अस्यां भित्तौ ग्रीसकलाकातः चित्रस्य समग्रं यथातथ्यं प्रतिबिरबं प्रगारितम् अभवत्। इयत् स्वच्छं यत् चित्रं किं दर्पणः कः इति स्पष्ठं न अभवत्।

अहो, एषा कलाकृतिः तु अधिकतरा। अधिकतया सुदंरा। अहो कौशल्यम् एतस्य प्रतिविधातुः। उद्गीर्णवान् सम्राट्।

एषा न कलाकृति  अपि तु निर्मलं, नितांतसुंदरं ..............पादर्शिणः हृदयस्य दर्शनम् एतादशं हृदयं क्वचिदेव।



# असहयोगिनी पत्नी

-डॉ. शिवप्रसाद त्रिपाठी

एकस्मिन्नगरे धर्म कार्यशील: रामसागर: व्यक्ति: प्रति वसतिस्म।

सतुधार्मिक: साधुसन्तविदुषां वस्त्र भोजनादिभि: सत्करोति।

प्राय: कोऽपि साधु सन्यासी जनं भोजनादिभि: सन्तुष्टयति। एतेषु कार्येषु धन व्ययमपि भूयात्। अत: आर्थिक संकटमपि विलोक्य पत्नी भानुमती विचचार। यदि पति महोदय: एतादृक् निरर्थक धार्मिक कार्येषु धनस्य व्ययं न करोतु तत्तु एक वर्षे एव बहु धनस्य सञ्चयं भवितुं शक्नोति। तद्धनेन मम वस्त्रा-भूषणानि बहूनि भविष्यन्ति समाजे मान मर्यादा विवर्द्धिष्यति, इति विचार्य भविष्ये साधु सन्तानाभागमनं न भवेत् इति निश्चयति। द्वितीय दिवसे एव एक: स्थूलशरीरसाधुमानीत: रामसागरेण। गृहस्य वहि: संल्लग्न कक्षे उपाविशत्। सम्मुखे एव अंगणमासीत्। पत्नी योजनानुसारेण कार्यम् प्रारभत्। पंडित रामसागर: पाण्डित्य कार्य न जानातिस्म अत: पञ्चदश मुसलान् आनीय कक्षकोणे स्थापयति प्रतिपदादितिथ्यानुसारेण द्वितीय कोणे मूसलधृतंगणनां कृत्वा आगत जिज्ञासुं तिथि ज्ञानं कारयति। ग्रामवासिन: पण्डित रामसागरस्य पण्डित रूपे समादरयन्तिस्म। रामसागर: पत्नीं वदति, सुसाधुरागत:। स्वादिष्ट भोजनं निर्मीय स्वागतं कुर्यात्। त्वम् भोजनस्य व्यवस्था कुरु अहं तु आपणात् मिष्ठान्नमानयामि। इत्युक्त्वा स आपणं गत:। पत्न्या तु मूसलद्वयं अंगणे सशब्दं प्रक्षिप्य रुदती तैल पात्रात् तैलं निष्कास्य मुसलयो: रुपरि लेपयति। इति दृश्यमवलोक्य आश्चर्य चकित: साधु विचारयति यत् भोजन व्यवस्थां परित्यज्य एषा साश्रुमुखी विचित्र कार्ये संल्लग्ना। साधु: पत्नी भानुमतीं पृच्छति। भो! भद्रे रोदनस्य कारणं ब्रूहि। सा कथयति पण्डितस्य व्यवहारं मां न रोचते। प्रथमं तु साधुमामन्त्र्य सादरं भोजनं कारयाति पश्चात् मुसलेन बहु ताडयति। अत: तद्व्यवहार: मां दुखीकरोति इत्युक्त्वा स्वकार्ये संल्लग्ना।

साधु पूर्ण वृत्तान्तं श्रुत्वा भयभीत: वहि: निर्गत्य पलायित:। मार्गे रामसागर: मिलित: पृच्छति च साधो! कुत्र गच्छसि कथयति।

किञ्चिदावश्यक कार्य वशात् गच्छामि। स्व पत्नीदुर्विचारं परिज्ञात: गृहे शीघ्रंगत्वा पत्नीं पृच्छति साधु: किमर्थं गतवान्।

पत्नी कथयति अये एष: साधु लोभी अस्ति मलिन मूसलान् स्वच्छ कर्तुमंगणे धृतान् दृष्ट्वा कथयति मूसलद्वयं प्रदेहि। परन्तु भवत: मूसल: व्यक्तिगत ज्ञानार्थमत: मया न दत्तौ। अतर: सन्तुष्ट: गतवान् मम कोऽपि दोषो नास्ति।

रामसागरः अयेभद्रे! साधुयाचनां पूर्ण कर्तव्या मया अन्य मुसलयाः व्यवस्था करणीया भवति। पश्चात् मूसलद्वयं नीत्वा साधुंदातुमनुगच्छति तीव्रतया मूसलद्वयसहित रामसागरमागच्छन्नवलोक्य भयभीतः पलायितः परन्तु स्थूलत्वात् धावने असमर्थत्वात् स्थित्वा विचारयति यदि माम् ताडयति अहमपि ताडयामि। रामसागरः समीपमागत्य कर वद्धः वदति। भवान् कथं गच्छसि। साधुः पत्नी कथनं वाचयति। रामसागरः विचारयति मम धर्म कार्ये असन्तुष्टया भार्यया योजनानुसारेण दुश्चरित्रं कृतम् पश्चात् आनीत मिष्ठान्नं साधुं समर्प्य खादितुं प्रार्थयत्।

तथा प्रत्यागच्छति गहन विचारयति। पत्नीं बिना धर्म कार्यं भवितुं न शक्नोति।

**सी-३५०४/सै.-६/ सपना कालोनी**
**राजाजी पुरम् लखनऊ, उ० प्र०**

# पञ्चभुतकल्पना

-डॉ. के.वी.मेनन

दर्शनेषु पञ्चभूतकल्पना सामान्येन प्रतिपाद्यन्ते। पृथिवी, अप्, तेजः, वायुः, आकाशः इति पञ्चभूतानि। आङ्गलभाषायां यथा भाषापरिवर्तनं क्रियते चेत् पञ्चभूतानां व्याख्यानम् अर्थेषु स्यात्।

**अर्थान्तरः**

| | | | |
|---|---|---|---|
| **पृथिवी-** | **भूमिः** | **अथवा मृत्** | **-Earth** |
| **अप् -** | **जलम्** | '' | **-Water** |
| **तेजसः -** | **अग्निः** | '' | **-Fire** |
| **वायुः -** | **अनिलः** | '' | **-Air** |
| **आकाशः-** | **खम्** | '' | **-Sky ( Atmosphere)** |

एतादृश पञ्चभुतकल्पना अशुद्धमिति पण्डितवरेण्यः डॉ. एल्.ए.रविवर्मणः ''शरीरम्'' (SARIA'- Dr. L.A.Ravi Varma publish from the department of Ayurveda- printed at Goat press, trivandrum- 1947 price rs. 5-00) इति अस्मिन् ग्रन्थे प्रतिपादित व्याख्यानं साधु इति मन्यते।

१. यद् कठिनं सा पृथिवी – काठिन्यम् एव पृथिवी तत्त्वम् (Solidity)

२. यद् द्रवं तत् आपः द्रवं – द्रवत्वम् एव आपः तत्त्वम् (Liquidity)

३. यदुष्णं तत्तेजः – तापस्य नयनम्– तापनम् -Energy

(तापवर्धने प्रकाशस्यापि उद्भवः संभवति)

Heat and light , (Energy) ऊर्जस्य द्वे प्रकटीभावाः (Manifested forms) प्रकाश वेगमधिकृत्य wave Theory, Corpuscular Theory च पौरस्त्यजनानाम् अप्राप्यः नासीत्। ''स च जलमध्ये उपलादिप्रक्षेपे यथा तरङ्गः परितो जायते यथा वा कदम्ब गोलकं जायते, तथा आद्य शब्दो भवति'' ''सर्वदर्शनसंग्रहम्'' (SARIRA) इति पुस्तकात् उद्धरति)

४. यत् सञ्चरति स वायुः– चलति अथवा सञ्चरति।

५. यत् सुषिरं तदाकाशम् – ''स्थितिः' अस्ति तत् आकाशम् (Space)

आकाशस्य अवकाशमित्यपि अर्थः कल्प्यते। यत् अवकाज्ञो दीयते तदाकाशमिती। अवकाशस्य (Right ) इति आङ्गलेयपदस्य अर्थः न अनसूचयति। which gives accomodation - सर्वस्यापि स्थलः दीयते, सर्वस्यापि आवासः प्रददाति इति अवकाश पदस्य अर्थः। आकाशस्य (Ether) इति रविवर्मणः व्याख्यानम्। रामायणकाव्ये सीतादेवी स्वामातरं भूमीदेवीम् प्रति प्रार्थयति– '' यत् '' विवरं दातुमर्हसि'' इति। अत्र विवरम् इत्यस्य स्थलम् इति अर्थः कल्प्यते।

अतः पञ्चभूतानि द्रव्यस्य स्वर, द्रव, वातकावस्थाः तथा ऊर्जः, स्थलं च। एतानि पञ्चभूतानि प्रपञ्चस्य निधानम् इति आधुनिक शास्त्रकाराः, प्राचीनाः च पञ्चभूतानां पञ्चीकरणमेव प्रपञ्चस्य उद्भवकारणमिति कथयन्ति। इमं व्याख्यानस्य अपरव्याख्यान द्वारा Earth, water, fire, Air, Eether आदि प्रपञ्चभूतानि इति। परं Greater Foree Lesser Force इत्यादि।

योगशास्त्रदृष्टया मनुष्यशरीरे षट् आधारचक्राः तस्याः देवताः, तस्याः लोकाः, पञ्चभुततत्वानि, गुणाः ज्ञानकर्मेन्द्रियाणि, वर्णाः आदि सम्बन्धिता एका पट्टिका अस्मिन् विषयावगमने उपकारकं भवति।

| तत्वम् | गुणः तन्मात्रा | ज्ञानेन्द्रियः | कर्मेन्द्रियः | वर्णः | लोकः | देवता | चक्रम् | ऊँ प्रणवांशः | अवस्था |
|---|---|---|---|---|---|---|---|---|---|
| पृथ्वी | गन्धम् स्पर्शम् शब्दम् | प्राणम् | पादम् | पीतः | भूलोकः | ब्रह्मा | मुलाधारम् | 'आ' | जाग्रत विराट् विश्वः |
| अप् | रसम् रूपम् स्पर्शम् शब्दम् | जिह्वा | पाणी | श्वेतः | भुवर्लोकः | रुद्रः | स्वाधिष्ठानम् | 'म' | सुषप्तिः प्राज्ञः ईश्वरः |
| तेजः | रूपम् स्पर्शम् शब्दम् | अक्षि | पायु | रक्तः | स्वर्गलोकः | विष्णुः | मणिपुरम् | 'उ' | स्वप्नम् तेजसः हिरण्यगर्भः |
| वायुः | स्पर्शम् शब्दम् | त्वक् | उपस्थम् | चारम् | जनोलोकः | ईश्वरः | अनाहतम् | - | - |
| आकाशम् | शब्दम् | श्रोत्रम् | मुखम् | नीलम् | तपोलोकः | सदाशिकः | विशुद्धिः | विन्दुः | तुरीयम् ब्रह्म |
| मनसः सूक्ष्मतत्वं | | | | | महर्लोकः | शम्भुः | आज्ञा | - | शम्भु |

पृथिवीतत्वम् –

आपस्तत्वम् –

तेजस्तत्वम्

(अग्नितत्वम्)

वायुस्तत्वम्

आकाशस्तत्वम्

(शून्यावस्था)

इति श्री.पि. माधवस्य व्याख्यानम्।

(सान्दर्भिकरीत्या अशुद्धः एकः व्याख्यानमपि सूचयिष्यामि आयुर्वेदशास्त्रे प्रसिद्ध तिदोष सिद्धान्ते बात, पित्त, कफादि त्रिदोषाः Air, Bile, Phlegm इति भाषापरिवर्तनम् अशुद्धमिति। सिरायां (Nerves) प्रवहति शक्तिः भवति वातम् (Nerves impulses) तदा वातं अथवा वायु इति Neuro-chemical अथवा Eleetro-chemical phenomenon इति। वातरोगाः (Diseases of the Nerous system) इति। वायवः नानाविधः शरीरे प्रधानं Nerves and तस्य plexus इति।

तथा पित्तं इति Bike नास्ति। Engymatic Deticrities कपित्तम् अथवा आठीः नानाविधः इति परामृश्यमस्ति तथा कफम् Phlegm नास्ति। Tissue Flnisa इति परामृश्यमस्ति।

कैरलीभाषायामेव न , भारतीय इतरभाषायामेपि आयुर्वेदपण्डिताः एतावत् भाषापरिवर्तनं कुर्वन्ति इति दृश्यते। आयुर्वेद औषधानां सह क्रियमाणः आङ्गलीय सहित्ये च For Air trouble for bike tribles सामान्यता पश्यति।

उपरिदत्त शास्त्रीयवीक्षणम् प्रथमं दत्वं डॉ. एल्. ए. रविवर्मा महोदयः। तस्य आयुर्वेद शरीरमिति ग्रन्थे दृश्यते।

**–द्वारका**

# मनुभव

-शुकदेव शर्मा

यदास्मिन् लोके मानवः सर्वविध-इष्टानिष्ट-चिन्ता-क्लेश-राग-द्वेष-ईर्ष्या-कलह-स्पृहा-घृणा-पापभावविरहितान् राजोपमांश्च शैशव दिवसान् व्यतीत्य प्रौढत्वमापद्यते तदा सद्धर्मामिमुखा वृत्तिस्तस्य जायते। धर्माश्च तावन्नेके जगति। कतमस्तेषां समाश्रययणीयः स्याद्ः,इत्ययं प्रश्नः समुदेति तस्य मनसि।

भिन्नचित्तवृत्तिर्हि जनो दृश्यतेऽत्र जगति। कश्चन सम्राटवसिति 'बुद्धं शरणं गच्छ' यतो हि सर्वोत्तमेयं शान्तिप्रदा विचारधारा नैकेषु च देशेषु लब्धप्रसरा सभादरणीया च। अन्यः सबलं समादधति यद् धन-जन दृष्टया प्रबलाः, प्राप्तराज्यसमाश्रयाः, सर्वतः समृद्धाः सशक्ताश्च ईशुमतानुयायिनः। अतः समागच्छ ईसामसीहशरणं येन सर्वथा समृद्धीभूय समास्वादयेदं सर्वविधं भौतिकं जगत्। अपरश्च बहुशः सम्प्रेरयति ऐहिकं पारत्रिकञ्च सौख्यमुपभोक्तुं भव मौहम्मदीयः। इत्थमेवान्येऽपि धर्मिणः श्रवणप्रियै सरलैः समुधुरैश्च शब्दैः स्वीयायाः विचारधारायाः माहात्म्यं समुपवर्णयन्तः आकर्षयन्ति सम्मोहयन्ति च विमुग्धान् जनान्-'इत्थं भव, तथा भव'-इति।

एवमेवाधुनिके विश्वे-समाजवादी भव, साम्यवादी भव, पुञ्जीवादीवादी भव-सहशाः नैकधाा राजनैतिकाः विचाराधार अपि बहुप्रचलिता अवलोक्यन्ते। एतासामनुयायिभिः मुहुर्मुहुः सम्प्रेरितो मानवा आकुलचित्त इवासहायः?

किंकर्त्तव्यविमूढश्च जायते। सहजं स्वाभाविकञ्चेदं यदेकत्र गते रूष्टे चान्यास्मिन्, वर्गवाद-विवादः सम्भाव्यते। तस्मात् सहसा समुत्पद्यते-'अयं निजः परोवेति'

भावना यस्याः प्रभावाद् भोः? भोः? विश्वचर्चा-चर्चन-चतुराः? सभ्याः? ज्ञानपरायणा विवेकिनश्च भारतीयाः? राष्ट्रग्राममये साम्प्रतिके विश्वे-रूस-यूक्रेन-उत्तरी-दक्षिणी कोरिया, चीन-जापानप्रभृतिषु राष्ट्रेषु सीमा-भूक्षेत्रयोः पारसपरिको विवादाः; दावानल इव च सर्वतः प्रसर्पन्ती आन्तकवादस्य बिभीषिका भयमुत्पदयन्ती दरीदृश्यते जनहृत्सु। अथ च निखिलेऽपि जगति, यत्र-तत्र-सर्वत्र, छिन्दि-भिन्धि; मारय-कर्त्तयः त्रोटय-स्फोटय, प्रश्मय-अग्निसात् कुरूः त्रायस्व मां, पाहि मां; हा हतोऽस्मि-इत्येवंविधाश्चीत्का-रध्वनयः सततं रूजन्ति कर्णष्कुलिं कोमलयन्ति च सहसा पाषाणहृदयानपि मानवान्।

अद्यत्वेऽपि यदा-यदा दृग्गोचरत्वमापद्यते दैनिकवृत्तपत्रेषु भारतचीनराष्ट्रयोः सीमासमस्यायाः विकरालरूपता सन्दृश्यते च कम्युनिष्टचीनचपलायाश्चपलो वर्गसंघर्षः। कुत्रचितद् भारत-पाकयोः काश्मीरममिलक्ष्य प्रदेशविवादोऽन्यत्र च संयुक्त-अरब-गणराज्यस्य इजराईलस्य चान्योन्य सर्वस्यविनाशाय सैन्यकलहः। अपरत्र सीरिया-यमन-इराक-अफगानिस्तानप्रभृतीनां राष्ट्राणां गृहयुद्धस्य तु का कथा?

क्वचित् स्वार्थपरायणैः नायकैरन्नीयन्ते नागरिकाः विपथेषु अन्यत्र च दलबन्धस्य, मतस्यन्यायस्य, सैनिकक्रान्तेः, अनाचारस्य, दुराचारस्य, भ्रष्टाचारस्य, अत्याचारस्य बहुविधानां सामाजिक-विसङ्गतीनाञ्च साम्राज्यं विलोक्यजक सर्वतः।

विश्वस्यास्यां दोलायमानायां, अस्थिरायां शोच्याञ्च स्थित्याम्नुश्रूयते-तपोनिरतानां, त्रिकालज्ञानां, परहितकातराणां, स्वापरभावविसंवादीनां,सुख-शन्ति-सद्भावना-परोपकार-प्रसारणेदत्तचेतसां, सर्वप्राणिषु-अद्वैततत्त्वम-व लोकयतां, यशः शरीरीणां महर्षीणामाश्रमेभ्यः प्रभाते सहस्रमरीचिमालिनः प्रथमोदीयमाना-द्यरश्मिरिव समागच्छन् ध्वनिरेकः-अशान्तेषु शन्तिं, विवादमानेषु ऐकमत्यं, कलहायमानेषु सामञ्चस्यं, द्वेषवत्सु सौहार्दं, अकरूणेषु, कारूण्यं, वैमनस्येषु सामनस्यं सञ्चारयन्-'मनुर्भव-मनुर्भव' इति हृदयाह्-लादकः समुद्घोषः।

सम्प्रति समुदेति सम्प्रश्नोऽत्र कोऽभिप्रायोऽस्य-'मनुर्भव- इति समुद्घोषस्य? अस्या अभिसन्धेः (सोद्देश्योद्घोषणायाः) स्म्यगवबोधाय समापतति विचारकाणां विचारदृष्टिः श्रीमद्भगवद्गीतायाः -

'अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च' (गी.१२.१३)

' अनपेक्षः शुचिर्दक्षः उदासीनो गतव्यथः, (गी. १२.१६)

' समः शत्रौ च मित्रे च तथा मानापमानयोः (गी. १२.१८)

'अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम्<br>
दया भूतेष्वलोलुप्त्वं मार्दवं हीरचापलम् ।। (गी. १६, २)

' तेजः क्षमा धृतिः शौचमद्रोहो नातिमनिता' (गी.१६,३)

इत्यादिषु पद्येषु। सम्भवतः गीतायामनुस्यूतान् इमानेव मानवीयान् भावानभिलक्ष्यैव सकलशास्त्रनिष्णातेन, वेद-वेदाङ्गतत्त्वविदा, निखिलनीतिशास्त्रविचक्षणेन वेदव्यासमुनिना विन्यस्तं महाभारते-''**गुह्यं ब्रह्मतदिदं वो ब्रवीमि न मानुषात् श्रेष्ठतरं हि किञ्चित्**''- (म.भा.शा.प १२,२८८,२०)। एवमेव भारतीय विश्वदृष्टिः-

**'' सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।<br>
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग् भवेत्।।**

उपरोक्त-मानवीय-समभावभावनमिर्निर्भरंभरिते मननशीले मानवे को नाम आक्रान्ता? कस्योपरि आक्रमणम्? कुत्रत्यं वैरम्? केन सह शत्रुता विरोधो वा? कथम्भूतः सीमाविवादः? किमर्थं परराष्ट्रापरहणम्? को लाभः स्वप्रभुत्वस्थापनेन? कुत्रत्यश्चायं सर्वप्राणिसंहायकः समरः? कस्मादातङ्कवादस्याहर्निशं अवाञ्छिता च बिभीषिका? इत्थं सत्यं विचारिते न समुदेष्यति साम्य-समाज-पुञ्जीवादादीनां धार्मिकाणां वा विचारद्वन्दानां वादविवादो वर्गसङ्घर्षो, द्वेषो, विवादः स्वत्वस्यापहरजादिकञ्च।

जगतीह- 'मनुर्भव'-इति भावविरहितया भावनयमिभूतैः स्वल्पैरेव निर्मयादैः निर्लज्जैश्च तिरस्क्रियन्ते असहायाः बालाः प्रमदाश्च, सर्वविधोपौक्षः प्रवञ्चकैः प्रवञ्च्यन्ते निरीहाः विमुग्धाश्च

प्राणिनः, लुब्धैः लुण्ठकैर्वा लुण्ठयन्ते साधारणः जनाः। प्रायेण मानवाः मानवत्वं (मानवीयान् सद्गुणान्) विस्मृता एवावलोक्यन्ते इदानीन्तने विश्वे यतो हि द्विसप्ततिः वर्षाणि यादद यज्ञीयधूमापेक्षया हिरोशिमा-नागासाकी प्रभृतिषु नगरेषु हृदयविहीनै दानकवैरूज्जवलितो युगान्तानलीयो धूमो दृष्टः। अद्यत्वेऽपि विश्वस्य नैकभागेषु (आतङ्कवादजनितः) तत्तुल्य एव दृश्यो दृश्यते। भ्रातृभावस्य, सहास्तित्वस्य समवेदनायाः, सहिष्णुतायाः, समतायाः, सच्चरित्रतायाः, सुहृदयतायाः, सुमतेः, बृहच्चेतसश्च जनेष्वभावात् विश्वशान्तिरपेक्षया श्मशानशान्तिरिव प्रतिभाति मे विश्वम्।

महाकालप्रतिमायां अप्रतिकारमय्याञ्चास्यां स्थित्यां भारतीयानामाद्यग्रन्थस्य 'ऋग्वेदस्य' दिव्यज्ञानसंवलितं, विश्वोद्धारकं, सर्वशान्तिप्रदं, अनन्यगतिकं, अद्वितीयञ्च महावाक्यं- 'मनुर्भव'- इत्युद्भावयति मे हृत्तन्त्रीः। सर्वप्राणिहितानुलिप्तायाः, उच्चदर्शसंवलितायाश्च भारतीय संस्कृतेः- 'सर्वजनसुखाय-सर्वजनहिताया'-समुद्घोष एव मानवदृष्टिं तस्य च विचारसन्ततिं, मनो वा परिशोच्दुं क्षमः। पूर्वोक्ता अन्ये चापि श्रीमद्भगवद्गीतायाः श्लोकास्तु मनोर्मनुत्वं प्रतिपादयितुं क्षमा एव परन्तु 'मनुस्मृति' आदिष्वपि भारतीयेषु ग्रन्थेषु- 'धुतिः क्षमा दमोऽस्तेयं'- इत्यादिरूपेण निस्यूता अपि भावाः -'मनुर्भव'- इत्यस्मिन् समावेश्या सन्ति।

प्रसभं प्रभुत्वस्य, सैन्यबलस्य, आत्मबलस्य, आत्मविचाराणां, स्वाभिलाषाणां वान्यत्रारोपणं न प्रशस्यो मानवस्यभावः। प्राणीप्राणापहरणं पराहितकरणञ्च नैतत् पशुकर्म युज्यते मानवेषु। एतद्विपरीतं आनृशंस्यं, उदारचित्तता, सर्वभूताहितेऽभिरूचिः, सौहार्दं, अन्योन्यस्नेहाचारः, धृति-क्षमादयश्च सन्ति मानवीयाः नैसर्गिकाः गुणाः। स्वार्थमिभूत एव नरः पाशवं आसुरं वा भावमापद्यते येन प्रेरितोऽसौ अनाचारे प्रवर्तते। नरश्चरेद् धर्मं न वाचरेत्; स्मरेदीश्वरं न वा स्मरेत् अनुतिष्ठेद् यज्ञादिकर्म न वानुतिष्ठेत्, अर्चेत् कञ्चन देवं न वार्चेत् परं मनुष्यः विशुद्धहृदयः बाल इव निर्द्वेषः, निःसङ्गः, निर्लिप्तः, समदृष्टिस्याच्चेत् नियतं स मनुरपि देवो भवेत्-; लोकमिममेव चाचरेत् स्वर्गम्। जीवने सर्वोपरि- 'मनुर्भव'- एष एव आद्यानां ऋषीणामादेशः, शिवसङ्कल्पः, सन्देशः, सर्वहितकारी जीवनोपनिषच्चा।

आधुनिककवेः श्रीहरिश्चन्द्रस्य वचांसि सहसापूरयन्ति मे ऽन्तस्तलं दिवानिशम् :-

'' भवध्वं भो? , ख्रैस्ता ब्रजत पदवीमीशुमसिहां<br>
वदत्येवं ह्येको भवत यवनायूयमिखल'।<br>
महावीरं बुद्धे व्रजत शरणं चैवमितरौ<br>
परं वेदादेशो भवत मनुजा इत्थमिह भोः? ।। ''

**-साधु आश्रमः,**<br>
**होशियारपुर पंजाब**

# किंनिर्णयः क्रोधवशं गतस्य

**–ओम् प्रकाश ठाकुरः**

कश्चिद् दुरात्मा साधुवेषं प्रधार्य लोकान् वाग्जाले निपात्य तान् धत्तूरम् आशयति स्म। धत्तूर सेवनेन मोहमुपगतानां तेषां धनान्यहरत्। धत्तूरस्य प्रभावेण केचिद् अम्रियन्त, केचन प्रमत्ता आजायन्त। स्वविरोधिनो विनाशयितुं कैश्चित् नीचौः पुरुषैः तेन ''साधुना'' इदं कार्यम् अकार्यत। सोऽपि धनलोभेन एतद् दुष्कृत्यम् अकरोत्।



तस्यैतत् कृत्यं विज्ञाय तेनालीरामः दुःखमन्वभवत्। ईदृशः पुरुषः अवश्यं दण्डमर्हति, किन्तु धत्तूरनिषेवणस्य प्रमाणाभावात् किमपि विधातुं न शक्यते स्म। अतएव स 'साधुः' सर्वत्र निःशङ्कं विचरति स्म।

एकस्मिन् दिने तेन ज्ञातं यत् कश्चिज्जनः सद्यः एव प्रमत्तो जातः। स नगरे यत्र तत्र विचरति। अकस्मादेव तेनालीरामेण स 'साधुः' दृष्टः। तमुपगम्य तेन सह वार्ताविनोदं कृत्वा स तं तत्रानयत्, यत्र स, प्रमत्तः आसीत्। तेनालीरामः सहसा स्वकरगृहीतेन 'साधोः' करेण प्रमत्तस्य शिरसि प्रहारमकारयत्। प्रमत्तः जनः कुपितः सन् तस्य साधोः केशान् निगृह्य एकस्मिन् पाषाणे तस्य शिरसः सघट्टमकरोत्। पुनः पुनः सङ्घट्टेन स 'साधुः' गतप्राणो जातः।

साधोः सम्बन्धिभिः राज्ञे आवेदितं यत् तेनालीरामेण प्रमत्तं प्रोत्साह्य तेन साधोः वधः कारितः। महाराजेन प्रमत्तो जनः प्रमत्तावासे प्रेषितः आदिष्टं च, प्रमत्तस्य साहाय्येन साधुहत्यारोपी तेनालीरामः गजपाद- विमर्दनेन हन्यताम् इति। तस्मिन् दिने सायंकाले द्वौ आरक्षिणौ तेनालीरामं आदाय विजनं वनं प्रापतुः। तत्र भूमिं नित्वा तस्या अन्तः तेनालीरामम् आकण्ठं निवेश्य गजमानेतुं गतवन्तौ।



**निर्णयं न प्रकुर्वीत नरः कोपवशं गतः।**
**स आत्मानं परं चापि क्लेश एव निपातयेत् ॥**

तदैव कश्चित् कुब्जो रजकः तत्र समायातः, तथाविधं तं विलोक्य च पृष्टवान्–कथमसि त्वं भूमौ निखातः। सोऽवदत्– भ्रातः। अहमपि त्वमिव कुब्जतापीडितः आसम्। जनानाम् उपहासं व्यंग्यवचांसि च सहमानोऽहं दशवर्षाणि बहुदुःखन्यन्वभवम्। मम भार्याऽपि मां तिरस्करोति स्म। तदैकेन महात्मनाऽहमुपदिष्टः यदस्मिन् पवित्रे स्थाने निमीलितनयनो धृतमौनश्च भूमौ निक्षिप्तदेहो यदि स्थास्यसि तव कष्टानि दूरीभविष्यन्ति। मृत्तिकां नित्वा मां बहिः निष्कास्य पश्येः किं मम कुब्जत्वं निरस्तं न वा?

श्रुत्वैव रजकः मृदोऽपसारणे संसक्तः जातः। किञ्चित् कालानन्तरम् अपनीतायां मृदि तेनाली बहिरागच्छत्। रजकोऽपश्यत् तस्य पृष्ठं सर्वथा कुब्जत्वविहीनमास्ते।

**परेषामुक्तिमाकर्ण्य समीक्षन्ते न ये धिया।**
**विश्वसन्ति दृढं तेषु ते नरान विवेकिनः ॥**

रजकोऽवदत्– मित्र। अहमपि अनया रुजाऽतिक्लेशमनुभवामि। रोगान्मुक्तिमिच्छामि। त्वं मामपि भूमौ निवेशय। एतानि वस्त्राणि रजकानामावासे मम पल्यै दास्यसि, मदीयम् उपाहारं सा अत्रैव प्रातरानेतु– इति निर्देष्टव्यमपि। नाहं कदापि त्वत्कृताम् उपकृतिं विस्मरिष्यामि। मम पल्यै त्वया एतन्न वक्तव्यं यत् श्वः एव कुब्जता अपयास्यति। अहं स्वयं रोगनिर्मुक्तः सन् तां विस्मय–विमुग्धां कर्तुमिच्छामि।

**ईदृशाः सरला मुग्धाः प्रायो धूर्तैश्च वञ्चकैः ।**
**दुःसहां वञ्चनां प्राप्य सीदन्ति विलपन्ति च ॥**

सर्वं यथानिर्दिष्टं भविष्यति– इति आख्याय तेनालीरामस्तं भूमौ यथावत् निवेश्य वस्त्राणि आदाय ततो गन्तुमुपाक्रमत। गमनात् पूर्वं स निर्दिष्टवान् यत् अक्षिणी निमील्य वाचं च संयम्य स्थातव्यम्। अन्यथा अभीष्टलाभो न भविष्यति। रुजोऽभिवृद्धिरपि सम्भाव्यते।

रजकस्तस्मै आश्वासनं प्रयच्छन् प्राह अहं यथावत् नियमपालनं करिष्ये इति। तेनालीरामे प्रस्थिते राजपुरुषौ तत्रोपेत्य अपरं कञ्चित् तत्र निखातम् अपश्यताम् अपृच्छतां च कस्त्वं रे! कस्त्वामत्र निवेशितवान्। रजकः किमपि नावदत्। तौ ऊचतुः–कथं मौनं धारयसे? अत्र आवाभ्यां मृत्युदण्डप्राप्तः पुरुषः नितः आसीत्। तस्य शिरोमर्दनाय आवां हस्तिनमादातुम् अगच्छाव। त्वं तस्य कश्चित् सम्बन्धी प्रतीयसे। तस्य पलायने साहाय्यमाचरन् त्वमेव हस्तिपादेन मृदितो भविष्यसि। तथ्यं विदित्वा रजकः सम्भ्रान्तमनाः जातः। स चक्षुषी समुन्मील्य प्राह– ईदृशम् अन्यायं मा कुरुतम्। अहं तस्य सम्बन्धी नास्मि। अहं तु कुब्जता–निवारणाय अत्र निवेशितोऽस्मि। ततः स सर्वं वृत्तमश्रावयत् ।

तौ आहतुः–रे मूर्ख! किमेवं करणेनापि कुब्जताऽपयाति? अपराधिपलायनसहायः त्वं दण्डनीयोऽसि।

विपर्यस्तां स्थितिमालक्ष्य धैर्यमाश्रित्य स रजकः प्राह–यदि अहं दण्डं लभे, तदा युवाम् अपि दण्डभाजौ भविष्यथः। यतः मृत्युदण्डप्राप्तं भीषणम् अपराधिनम् एकाकिनं हित्वा उभयोः गमनम् उचितं नासीत्। अहमिदं सर्वं महाराजाय निवेदयिष्यामि। तदा भवन्तौ एव दण्डतौ भविष्यतः, नाहम्। महाराजः

एतादृशं भवतोः प्रमादं कदापि न क्षमिष्यते।

एतन्निशम्य राजपुरुषौ किं कर्तव्यविमूढौ जातौ। तदा कश्चिद् वृद्धः तत्र समायातः। स पृष्टवान्-अयि कोटपालौ। कथं चिन्तातुरौ लक्ष्येते भवन्तौ? एकः आरक्षी सर्वम् वृत्तमश्रावयत्। वृद्ध उवाच- अलं चिन्तया। भवद्भ्यां कथनीयं यत् अपराधी धरण्या निगीर्णः।

इतः महाराजेन अपि अवगतं यत् प्रमत्तेन हतः साधुः दुष्टः पाखण्डी चासीत्। कृष्णदेवः स्वक्षिप्रकारितायां शोकमन्वभवत्। तेनालीरामसदृशं बुद्धिमन्तं सुहृदं विनाश्य स विषण्णो जातः।

तदैव राजपुरुषौ वृद्धेन सह तत्र आगच्छताम् अवदतां च महाराज! धरणी तेनालीरामं निगीर्णवती। इदं श्रुत्वा महाराजोऽतीव मोदमवाप उवाच च  अस्यायम् आशयः यत् तेनालीरामः बुद्धिकौशलेन आत्मानं रक्षितवान्। यद्यपि युवां दण्डा स्थः किन्तु तेनालीरामो जीवतीति समाचारेण अहं युवाभ्यां क्षमादानं प्रददामि। श्वः युवाभ्यां तेनालीरामः अन्विष्य उपस्थापयितव्यः। अन्यथा कठोरं दण्डं प्राप्स्यथः ।

महाराजो विजयताम्-इति वदन् स वृद्धः कृतकं वेषमपसार्य अब्रवीत्-तेनाली उपस्थितोऽस्ति-

महाराजः समुत्थाय तं परिषस्वजे उवाच च अहं स्वनिर्णये अनुतपामि।

तेनालीरामं जीवन्तं वीक्ष्य द्वेषपराणां सभासदां कीदृशी दशाऽभवत्- को जानीते। ते चिन्तयन्ति स्म- एष दुरात्मा मृत्युं प्रतार्य समागतोऽस्ति।

# यथार्था दीपावलिः

–डॉ. शारदा रमेश गाडगे

रमा अद्य प्रातः काले एव शय्यात्यागम् अकरोत्। नैकानि कार्याणि आसन् तस्याः मनसि। यतो हि दीपावलिः गृहस्य देहल्यामेव आसीत्। गृहस्य स्वच्छता, खाद्यवस्तूनां पूर्वसिद्धता, नूतनवस्त्राणां क्रयः, कानिचन क्रीडनकानि, विविधानि स्फोटकानि, रङ्गावलिचूर्णं सर्वं पूर्वमेव सज्जीकृतम् आसीत् तया महता उत्साहेन। नासीत् भर्तुः नारायणस्य कोऽपि सहभागः सहकार्यं वा। दशवर्षेभ्यः अनन्तरं तस्याः पुत्रः राघवः दीपावल्यर्थं सपरिवारम् आगन्तुकामः इति वार्ता तस्याः कृते नूनम् अमृतवर्षिणी एव आसीत्।

राघवः तस्याः एकमेव अपत्यम्। महता लालनेन संवर्धितम्। तस्याः आशास्थानं, नेत्रज्योतिः सर्वमेव सः एव। राघवः अपि कुशाग्रबुद्धिः विनयशीलः मितभाषी पितृभक्तश्च। पितुः इच्छाम् अनुसृत्य भूरि परिश्रमं कृत्वा तेन जैवविज्ञानस्य अध्ययनं कृतम्। तस्मिन् एव क्षेत्रे अधिकम् अन्वेषणं कर्तुं सः अमेरिकादेशं गतः। तस्य गमनेन रमा दुःखिता अभवत्। 'आवयोः एकलः पुत्रः आवाभ्यां सह एव निवसतु इति तस्याः इच्छा। किन्तु नारायणः ताम् असान्त्वयत् –'अयि, मा अन्यथा चिन्तय। तस्यइप्रगतौ एव आवयोः आनन्दः। तेन अग्रे एव गन्तव्यम्। वात्सल्यस्य आवयोः व्यतिकरः तस्य मार्गे मा भवतु।" पुत्रस्य उत्कर्षार्थं रमया स्वभावनाः नियमिताः। राघवस्य अनुपस्थितौ सा एकाकित्वं रिक्तत्वं च अन्वभवत्। केवलं दूरभाषः तस्याः साहाय्यार्थम् आसीत्। तस्मिन् यन्त्रे पुत्रस्य शब्द श्रुत्वा सा आत्मानम् असान्त्वयत्।

अध्यापनं समाप्य राघवेण आचार्य–उपाधिः अधिगतः। नारायणेनमहता उत्साहेन सर्वत्र मिष्टान्नं वितरितम्। "यदा राघवः अत्र आगमिष्यति तदा सर्वम् आप्तवर्गं भोजनार्थं निमन्त्रयावः' तेन मनीषा प्रदर्शिता। पुत्रः अपि तथा सूचितः। सः अवदत् – 'तात, अवकाशः एव नास्ति। अत्र एव संशोधककरूपेण जीविका मया प्राप्ता। यथावकाशमवश्यमागमिष्यामि।" पुत्रस्य उत्तरेण नारायणः निराशः अभवत्। रमा अपि पुत्रदर्शनार्थम् अतीव उत्सुका अधीरा च आसीत्। एवमेव प्रतीक्षायां चत्वारि वर्षाणि कूर्मगत्या अतीतानि। रमायाः नेत्रे क्षीणतां गते। नारायणस्य उत्साहः विरतः।



एकदा अकस्मात् दूरभाषद्वारा सूचयित्वा राघवः स्वगृहं प्राप्तः। रमा- नारायणयोः आनन्दः नभसः पारं गतः। राघवेण सह वार्तालापः, तस्य प्रियाणि खाद्यान, तं सर्वम् अत्रस्थं वृत्तं श्रावणीयम्, अमेरिकावर्णनं श्रोतव्यम्-नैकानि कार्याणि। सप्ताहः वायुवेगेन पलायितः। राघवस्य प्रस्थानवेला समागता। प्रातःकाले चायपानं कुर्वत्या रमया उक्तम् "राघव, तव कृते वधूः अन्वेषणीया इति आवयोः इच्छा। कीदृशी भार्या तव मनसि वर्तते? स्वैरं वदतु। किञ्चिद् दीर्घं निःश्वस्य राघवः अवदत्-"तात, अम्ब, तदेव वक्तुमहमत्र आगतोऽस्मि।" पुत्रस्य वचनं श्रोतुं रमया हृदयं कर्णे एकत्रितम्। नारायणस्य औत्सुक्यं तस्य नेत्रयोः केन्द्रीभूतम्। राघवेण स्वनिवेदनम् अग्रे नीतम् -'अम्ब, अहं सारानामधेयाम् आङ्ग्लां कन्यां भार्यारूपेण इच्छामि। आवयोः दृढा प्रीतिः। तत्र विदेशे सा एव मम सर्वां चिन्तां वहति। रूपगुणसम्पन्ना अस्ति सा। भवद्भ्यां नूनं रोचेत।"

''असम्भवम्। न मे रोचते आङ्ग्ला स्नुषा। मूर्ख, अपि एतदर्थं तत्र प्रेषितः त्वं मया? तया आङ्ग्लकन्यया अत्र कदापि न आगन्तव्यम्। तस्याः कृते नास्ति अत्र किमपि स्थानम्। त्वमपि तया सह तत्र एव निवस।" नारायणस्य क्षोभः शब्दरूपेण अवतीर्णः। क्रोधात् तस्य शरीरं कम्पितम्। रमा तं प्रसादयितुं प्रायतत। सः राघवेण सह सम्भाषणम् अत्यजत्। रमा राघवस्य मतं परिवर्तयितुं भृशं प्रयत्नम् अकरोत्। अन्ततोगत्वा पितरं मूकत्वेन प्रणम्य मात्रा दत्तं भोजनादिकं साहित्यं स्वीकृत्य सः प्रस्थितः।

गृहस्य वातावरणमेव परिवर्तितम्। ननु वातप्रभञ्जनः आगच्छत्। नारायणः राघवस्य विषये किमपि न अभाषत। रमया प्रयत्ने कृते सः अवदत्

''तं विषयं विहाय अन्यद् वदतु।" राघवेण सह दूरभाष-संवादः अपि तेन बहिष्कृतः। रमा-राघवयोः संवादः पूर्ववदेव आसीत्। राघवेण सारया सह सम्पन्नस्य परिणयस्य छायाचित्राण्यपि प्रेषितानि। छायाचित्रगतां पुत्रवधूं दृष्ट्वा रमा आनन्दिता। "मम पुत्रस्य हिते मम हितम्। तस्य आनन्दे मम आनन्दः" इत्यासीत् तस्याः विचारः। नारायणाय तु एष विचारः न मनागपि अरोचत। सः न पुत्रविवाहस्य छायाचित्राणि अपश्यत् न वा तेन सह, सम्भाषणमकरोत् दूरभाषमाध्यमेन।

वर्षमेकमतीतम्। राघवस्य वैवाहिकजीवने नवानन्दः अवतीर्णः। सारा पुत्ररत्नं प्रसूतवती। वार्तां श्रुत्वा शिशोः छायाचित्रं च दृष्ट्वा रमा अत्यानन्देन अनृत्यत्। पौत्रं स्प्रष्टुम् अधीरा अभवत्। पुत्रस्य तत् शिशुरूपं द्रष्टुं तस्याः नेत्रे उत्कण्ठिते। नारायणेन न कोऽपि प्रतिक्रिया प्रदर्शिता। न वा कुत्रापि मिष्टान्नं वितरितम्। रमा तमवदत् -''भोः, आवां राघवं सपरिवारम् अत्र निमन्त्रयावः, तस्य पुत्रस्य नामकरणसमारोहः अत्र भवतु इति मे मनीषा। तन्निमित्तं सर्वे सम्बन्धिनः सम्मिलन्ति।" किन्तु नारायणेन भार्यायाः एषा इच्छा न पूरिता। पुत्रं, स्नुषां, पौत्रं च भविष्यति काले कदाचित् प्रेक्षिष्येम इति आशा आसीत् तस्याः मनसि। एषः दृढः आशाबन्धः तस्याः जीवनाधारः आसीत्। किन्तु भर्तुः अनुमतिं विना पुत्रं गृहागमनाय निवेदयितुं नासीत् तस्याः धैर्यम्। अद्ययावत् भर्तुरिच्छा तया न कदापि दुर्लक्षिता। इदानीं जीवनस्य उत्तरायणे किमर्थं तस्य आज्ञा उल्लङ्घनीया इत्येव आसीत् तस्याः मतम्।

शनैः शनैः चत्वारि वर्षाणि अतीतानि। राघवस्य पुत्रः रमणः चतुर्वर्षीयः अभवत्। एकदा राघवः रमां दूरभाषमाध्यमेन अवदत् –''अम्ब, सारा तातं भवतीं च द्रष्टुमिच्छति। रमणः अपि पितामहं पितामहीं च द्रष्टुकामः। अहमपि प्रतिदिनं भवन्तौ स्मरामि। अतः आगामिन्यां दीपावल्यां गृहम् आगन्तुमिच्छामि। किन्तु तातस्य अनुमतिं विना नास्ति मे धैर्यं गृहं प्रवेष्टुम्। अहं तत्रभवते सचरणस्पर्शं क्षमां याचितुकामः। किन्तु तातः मम शब्दं श्रुत्वा दूरभाषमपि स्थगयति। किमहं करवाणि इत्येव न जाने।''

पुत्रस्य इच्छां श्रुत्वा महद् धैर्यं हृदि संकल्प्य रमया सर्वं निवेदितम्। कथं न जाने किन्तु ईश्वरकृपया तेन अनुकूलता प्रदर्शिता। अनुक्षणमेव पुत्रं तस्य भर्तुः अनुमतिं श्रावयित्वा तेषां स्वागतार्थं सा बद्धपरिकरा संवृत्ता। तस्याः शरीरे नूनम् उत्साहवायुः सञ्चरितः। तस्याः वयः नूनं दशवर्षैः न्यूनतां गतम्। नारायणः नासीत् तावान् सन्तुष्टः, किन्तु न तेन विरोधः प्रदर्शितः।

दीपोत्सवः समारब्धः। रमया गृहं विद्युद्दीपैः भूरि शोभायमानं कृतम्। नरकचतुर्दशी आगता। रमानारायणौ अभ्यङ्गस्नानं विधाय राघवपरिवारस्य स्वागतार्थं सिद्धौ। ''किं भविष्यति।'' इति आशङ्का तस्याः मनः अपीडयत्। "सारया सह कया भाषया सम्भाषणं भवेत्? तस्यै अस्माकं खाद्यवस्तूनि रोचन्ते वा न वा? अपि रमणः मम अङ्के उपविशेत्? असङ्ख्याः प्रश्नाः ताम् अस्वस्थताम् अनयन्।

प्रातः अष्टवादनसमये आटोवाहनं द्वारे समुपस्थितम्। दूरादेव तान् सर्वान् नेत्रदीपैः रमा नीराजितवती। द्वारे एव पुनश्च नीराजनं विधाय सर्वे गृहं प्रविष्टाः। नारायणः पुत्रवधूं निरीक्षमाणः आसन्दे उपविष्टः आसीत्। स्यूतादिकं कोणे स्थापयित्वा ते त्रयः नारायणस्य समीपम् आगतौ। तं सविनयं प्रणम्य राघवः सजलनेत्रः अवदत् –

"तात, क्षन्तव्यः अहम्।''

सारा अवदत "तात, प्रणमामि।" इति उक्त्वा सारया भारतीयपद्धत्या प्रणामः कृतः। अनन्तरम् उभावपि रमां प्रणम्य रमणं तस्याः अङ्के उपवेशितवन्तौ। चायपानादनन्तरं सर्वेषां स्नानादि समाप्तानि। सारा स्नानं कृत्वा भारतीयपद्धत्या शाटिकां धृत्वा रमायाः साहाय्यार्थं तत्परा आसीत्। रमणः आपि अतीव आनन्दितः आसीत्। सः चिरपरिचितवत् पितामहस्य अङ्के उपविश्य तेन सह आङ्ग्लमिश्रित–मराठीभाषया समभाषत। रमया दत्तं खाद्यं सः सानन्दम् अभक्षयत्। राघवः अविरतं किमपि अवर्णयत्। सारा अपि मराठीभाषया तेषां सम्भाषणे सहभागिनी अभवत्। तत् सर्वं दृष्ट्वा आनन्दितः नारायणः अजानन् एव तेषां सम्भाषणे सहभागी अभवत्। सर्वं सावधानं निरीक्षमाणा रमा हर्षनिर्भरा अभवत्। सम्पूर्णः दिवसः क्षणवत् पलायितः। सन्ध्यासमयः आपन्नः। सारया अङ्गणे कलापूर्णा रङ्गावलिः चित्रिता। रमया नैके तैलदीपाः प्रज्वालिताः। उभाभ्यां मिलित्वा लक्ष्मीपूजनस्य पूर्वसिद्धता कृता। रमया दत्तानि नूतनवस्त्राणि सर्वैः परिधृतानि। नारायणेन लक्ष्मीः सषोडशोपचारं पूजिता। राघवः रमणेन सह स्फोटकानामानन्दमन्वभवत्। अनन्तरं रमया नारायणः नीराजितः। सारया अपि राघवः शब्दापितः। रमायाः अनुकरणेन तया भर्ता नीराजितः। रमायाः मनमयूरः अत्यानन्देन अनृत्यत्। गतदशवर्षेभ्यः तस्याः नेत्रयोः सम्मर्दिताः मेघाः लुप्ताः। हृदये वर्तमानं विचारवातचक्रं विनष्टम्। नारायणस्य विरोधः दूरं गतः इति दृष्ट्वा तस्याः हर्षः शतगुणितः।

रात्रौ पुत्रं, स्नुषां पौत्रं च दृढं परिष्वज्य नारायणम् उद्दिश्य सा अवदत्– "भोः, अद्य अस्माकं जीवने सत्यार्थेन दीपावलिः आगता। आनन्दस्य प्रकाशेन अस्माकं जीवनम् उज्वालितम्। निराशायाः दुःखस्य अन्धकारः विनष्टः। एष दीपोत्सवः सार्थः अभवत्। हर्षदीपानाम् इयम् आवलिः सदैव अण्डिता अस्तु।" एतैः शब्दैः सह तस्याः नेत्राभ्यां निःसृता अगणिताः अश्रुधाराः तस्याः अपरिमितमानन्दं प्राकटयन्।



# भगवद्-भक्तः

-डॉ० केशवराम शर्मा

‘शामली’ जनपदस्यान्तर्गते ‘हथछोया’ इत्याख्ये ग्रामे पण्डितः ‘तिलकरामो’ नामधेय एकः सच्चरित्रो भगवद्भक्तोऽतिथिप्रियः परमकारुणिकः कृषकः सपत्नीको निवसति। तस्य भार्याऽपि परमसाध्वी, पतिसेवारताः, धर्मपरायणा, देवनदीगङ्गेव परमपवित्रभावोर्मिलैरुद्वेलितात्मा ‘गङ्गादेवी’ इति नाम्ना सुशोभिताऽस्ति।

तिलकरामस्य कृषिभूमिः ग्रामादतिदूरं वर्तते। कुल्याजलस्याभावे सा भूमिर्वर्षाजलोपरि निर्भरा अस्ति, अतः स्वल्पमेव धान्यं ददाति। यदा-कदा जलाभावेन पण्डितस्य धान्यं तथा शुष्कं भवति, यत्तयो-र्भोजनस्यापि काठिन्यं भवति। यद्यपि स सन्तानहीनो, धनहीनस्स्वल्पवसनश्चास्ति, किन्तु सदैव गोसेवारतोऽस्ति। तस्य गृहे सदैव द्वित्रिस्रो धेनवस्तिष्ठन्ति। तासां दुग्धमेव तस्य जीवनस्य सम्बलमस्ति।

तिलकरामो निर्धनो भूत्वाऽपि ‘‘अतिथिर्देवो भव’’ अस्य कथनस्य आदर्शोऽस्ति। यदा-कदाऽ नाश्रिताज्ञातजना अपि तस्यातिथ्यं गृह्णन्ति। देवर्षिनारदोऽपि तस्मिन् स्निह्यति। एकदा मुनिवरस्तस्य गृहे स्थित आसीत्। पण्डितस्तं प्रार्थयति -‘पूज्यप्रवर! भवान् भगवन्तं विष्णुं निकषा स्वेच्छया गच्छति। कृपया कदापि अवसरं प्राप्य मम पीडामपि तस्मै निवेदयतु ।”

नारदस्तं पृच्छति यत् स किं ज्ञातुमिच्छति? तदा पण्डितः कथयति- “द्वादशवर्षेषु मलस्थानस्यापि भाग्यपरिवर्तनं जायते”, इति भणितिरस्ति। कृपया तं भक्तवत्सलं पृच्छतु -‘‘मम गृहे पुत्रजन्मोत्सवः कदा भविष्यति? कदा चाहं धनधान्येन पूर्णो भविष्यामि ?” मुनिश्रेष्ठः तं प्रतिश्रुत्य गच्छति ।

ब्राह्मणं प्रत्युदारो देवर्षिः शीघ्रमेव जगत्पितरं निकषा गच्छति। तेन तथा पृष्टो जगदीशः स्पष्टं कथयति, यत् तिलकरामस्य सञ्चितकर्माणि प्रारब्ध कर्माणि च शुभानि न सन्ति। अतोऽस्यामवस्थायां सप्तजन्मपर्यन्तमपि तस्य गृहे पुत्रो न भविष्यति। पूर्वजन्मसु तेन धान्यस्य दानं न कृतम्, अतोऽस्मिन्जन्मनि तस्य धनधान्ययोगोऽल्प एवास्ति।

नारदो भगवते कथयति यत्-“स ब्राह्मणोऽतीव दयालुस्तव-भक्तोऽतिथिप्रियश्चास्ति। तस्यानिष्ट योगस्य निवारणार्थं कोऽप्यु-पायोऽवश्यमेव भवितव्यः। दीनानाथ! कृपया भवान् तं प्रत्युदारो भवतु।” जगन्नाथः कथयति-“सोऽद्यतनकर्माणां फलं श्वः प्राप्स्यति।’’ इत्युक्त्वा महाप्रभुस्तूष्णीं भवति। नैराश्यभावापन्नो महर्षिः पण्डितस्य गृहं गच्छति। साधारणशिष्टाचारानन्तरं ब्राह्मणाय सर्वं वृत्तान्तं सविस्तरं कथयति।

तिलकरामोऽत्यन्तकष्टेन पुनः तस्मै निवेदयति-‘‘भगवन्! पुनरपि भवानेकं कष्टं कुरु। मम प्रार्थनास्ति यत्-अहमस्य जन्मनः सर्वं धनधान्यमस्मिन्वर्षे एकवारमेव प्राप्तुमिच्छामि। तदनन्तरं यद् भावि तद् भवेत् ।”

महर्षिनारदो ब्राह्मणस्य हितमिच्छन् कतिपयदिवसाऽनन्तरमेव क्षीरसागरं गत्वा भगवते तिलकरामस्य निवेदनं सादरं प्रस्तौति। भगवान्विष्णुः –"भवन्! तं ब्राह्मणं प्रत्यतीवोदारोऽस्ति। स यद् वाञ्छति तदसम्भवमस्ति तथापि अस्मिन् जन्मनि तस्य भागधेये यावदन्नमस्ति, तस्याऽदुर्धांशं सोऽस्मिन्वर्षे प्राप्स्यति, किन्तु तदनन्तरं तस्य जीवनमत्यन्तं कष्टकरं भविष्यति।"

**नारदः** – "हे भक्तवत्सल प्रभो! कृपया इत्थमेव भवेत्।" [सादरं भगवन्तं प्रणम्य गच्छति।]

सर्वं वृत्तान्तं ज्ञात्वा ब्राह्मणोऽतीवप्रसन्नोऽस्ति। व्यतीतेषु केषुचिद्दिवसेषु तिलकरामो ग्रामवासिनश्च साश्चर्यं पश्यन्ति, यत्तस्य क्षेत्रेषु धान्यानामाशातीता वृद्धिरासीत्। पण्डितस्य सीमितक्षेत्रेषु तस्मिन् वर्षे धान्यानामीदृशीवृद्धिर्जाता, यत्तस्य सर्वाणि गृहाणि प्रतिवेशिनामपि च सर्वाणि गृहाणि तिलकरामस्य धान्येनैव पूरितानि सन्ति।

सोत्साहः पण्डितः सत्तरशालाया व्यवस्थां करोति। यत्र मध्याह्नकाले दशवादनतो द्विवादनपर्यन्तं सायंकाले च पञ्चवादनतो नववादनपर्यन्तं सर्वेभ्यो भोजनस्य व्यवस्था भवति। बहिर्ग्रामादागता जनाः साधुसंन्यासिनस्तस्य ग्रामस्य दरिद्रा जनाश्च तत्र सादरं भोजनं कुर्वन्ति।

एकदैकोऽष्टसंन्यासिनां दलोऽकस्मात्तत्रागच्छति। तिलकरामः स्वयं तेषां सेवाकार्ये लग्नो भवति। व्यतीतेषु दशवासरेषु यदा ते गन्तुमनसो भवन्ति, तदा तेषां गुरुदेवो दण्डीस्वामिमहोदयो ब्राह्मणाय आशीर्वाद ददाति– "वत्स! त्वं सर्वदैव अतोऽप्यधिकैर्धनधान्यैः सम्पन्नो भविष्यति। शीघ्रमेव तवगृहे पुत्रजन्मोत्सवोऽपि भविष्यति।"

स्वामिनं साष्टाङ्गं प्रणामं कृत्वा तिलकराम एकान्ते तस्मै देवर्षिनारदस्य सर्वं वृत्तान्तं कथयति। याचति च यत्स पूज्यप्रवरः, परमकारुणिकश्चास्ति तथापि स्ववरदानं स्वयमेव गृह्णीयात्, येन तस्मै मिथ्याकथनस्य दोषो मा भवेत्।

**दण्डिस्वामिमहोदयः**–

[किञ्चिद्रोषेण सह] मम वचनानि कदापि अन्यथा न भविष्यन्ति। सदैव तवगृहे धनधान्यानां वृद्धिर्भविष्यति। यतो हि तवानेन सत्तरसञ्चालनेन भवतां सर्वाणि पापानि विनष्टानि। कथञ्च सप्तजन्मपर्यन्तमपि पुत्रस्याभावः? भवान् यथाशीघ्रमेव न खलु एकस्य पुत्रस्याऽपितु द्वयोः पुत्रयोर्जनको भविष्यति।

पण्डितः सपत्नीकः पुनः पुनस्तेषां चरणवन्दनां करोति। ते प्रसन्नवदनास्ततो गच्छन्ति।

भगवान् स्वभक्तस्य सदैव विजयमिच्छति। वर्षमात्रस्याऽन्तराले गङ्गादेव्या उदराद् यमलपुत्रौ जन्म लभेते। पण्डितेन सह सर्वे ग्रामवासिनो हर्षमग्ना भविन्त। उत्सवानां सुदीर्घा परम्परा प्रतिदिनं वर्धत एव। पुत्रयोर्जन्मप्रसङ्गे तिलकरामेण सम्पूर्णग्रामाय मिष्टान्नस्य व्यवस्था कृता।

"आवश्यकता आविष्कारस्य जननी भवति" अस्मादेव नियमात् प्रथमं सत्तरशालाया निर्माणं भवति, तदनन्तरं गोशालाया धर्मशालायाश्च निर्माणं भवति, इदानीं पण्डितस्याऽट्टालिकायाः क्रमोऽस्ति।

देवर्षिनारदश्चिन्तयति यद् दुराग्रहिपण्डितस्य जीवनयापनमतीवकष्टपूर्णम् अदर्शनीयञ्च भविता, अतो तत्रगमनं कष्टकरं भवेत् तथापि स औत्सुक्येन सप्तवर्षाऽनन्तरं तिलकरामस्य गृहस्य समीपं गच्छति। तत्रत्यदृश्यं दृष्ट्वा देवर्षिर्हतप्रभ इव दृश्यते। तिलकरामस्य जीर्णशीर्णगृहं तत्र कुतोऽपि न दृश्यते। तत्र क्रीडन्तं सुन्दरं बालकयुगलं दृष्ट्वा नारदस्तं तिलकरामस्य गृहं पृच्छति। द्वावपि बालकौ देवर्षिं प्रणमतः, तदनन्तरमेको वदति–"इदं गृहं मम जनकस्यैवाऽस्ति। आगच्छतु भवान् पितृपादास्तत्र तिष्ठन्ति।"

**नारदः** – "वत्स! किमस्ति तव नामधेयम्? असौ बालकश्च कोऽस्ति?"

**बालकः** – "मम नामधेयं 'दातारामशर्मा' अस्ति। अयञ्च मम यमलो लघुभ्राता 'परशुरामशर्मा' अस्ति।"

संवादं श्रुत्वा तिलकरामो बहिरागच्छति। देवर्षिं दृष्ट्वा स सपदि तं साष्टाङ्गं प्रणमति। सर्वेऽन्तर्गृहं प्रविश्य गङ्गादेव्याः पार्श्वं गच्छन्ति। साऽपि देवर्षेः पादयोः पतति। दम्पती पुनः पुनर्देवर्षिं प्रति स्वकृतज्ञतां ज्ञापयतः। यतो हि अत्र यत्किञ्चिदप्यस्ति, तत्तस्यैव कृपायाः फलम्। देवर्षिः ब्राह्मणात्सर्वं रहस्यं ज्ञातुमुत्सुकोऽस्ति, एतद्विचार्य तिलकरामस्तमेकान्ते नयति। कथयति च तस्मै यत्तस्य गृहे लक्ष्म्या आगमनं कथं जातम्। पुनश्च भगवत्कृपया यथा तेन प्रतिदिनं सत्तरसञ्चालनं कृतम्। तदनन्तरं तस्य गृहे परिव्राजकानामागमनेन, यथाशक्तिस्तेषां सम्मानेन, दण्डिस्वामिनोऽसीमकृपातश्च तस्येयमुपलब्धिरस्ति। मुनिवर एवास्ति तस्याऽभ्युदयस्य सूत्रधारोऽतः स सपरिवारं तस्य ऋण्यस्ति।

सर्वं ज्ञात्वा नारदोऽतीवप्रसन्नो भवति। ब्राह्मणस्याऽऽतिथ्यं गृहीत्वा स यथाशीघ्रं भगवतो विष्णोः समीपं धावति। तस्य हृदये विष्णोर्मिथ्यावादनं प्रति अतीव कष्टमस्ति। विवर्णमुो नारदो यदा विष्णुलोकं गच्छति, तदा सर्वज्ञः प्रभुस्तं दृष्ट्वोदरपीडाया अभिनयं करोति। यावन्महर्षिः लक्ष्मीनारायणौ प्रणम्य किमपि वदेत् तावज्जगज्जननी कथयति–"वत्स नारद! प्रभुरुदर पीडया ग्रस्तोऽस्ति, अतोऽधिकः संलापो मा करणीयः।"

**नारदो रुदन्**– "लोकानां कष्टनिवारकोऽपि कथं कष्टेन द्यिते? हे जगदाधार! कृपया स्वपीडां मह्यं देहि।"

**विष्णुः**– 'वत्स! त्वमेव मम कष्टं हरिष्यसि। तां छुरिकां स्वकमण्डलुञ्च गृहाण। योऽपि मम भक्तः स्वेच्छया सहर्षञ्च, स्वहस्तेनैव निजहृदयरक्तेन एवं पूरयेत्, तद्रक्तमहं पास्यामि, तदेवाऽस्ति ममोदरपीडाया औषधम्।" एवमुक्त्वा प्रभुर्मूर्च्छितो भवति।

नारदश्छुरिकां कमण्डलुञ्च गृहीत्वा इतस्ततो गच्छति, यत्र-यत्र भक्तजना देवस्य गुणगानं कुर्वन्ति, कश्चिन्महात्मा जनेभ्यः प्रभुभक्तेरुपदेशं ददाति, जनैर्हरिकीर्त्तनं भवति, कीदृशोऽपि सत्सङ्गो भवति। तत्र गत्वा स जनेभ्यः कथयति, यत्स नारदोऽस्ति, क्षीरसागरे जगत्पिता भीषणोदरपीडया-ग्रस्तोऽस्ति। यदि कोऽपि हरिभक्तः स्वेच्छया सहर्षञ्च स्वहस्तेनैव निजहृदयरक्तस्य कमण्डलुमात्रं तस्मै ददाति तदा स स्वस्थो भविष्यति।

सर्वे जना हसन्ति। नारदाय कटुशब्दानां प्रयोगं कुर्वन्ति च। खिन्नो नारदोऽन्यत्र गच्छति। तत्रापि तथैवाऽपमानित:, स कान्दिशीको भूत्वा इतस्ततो धावति। अकस्मात् तस्य दृष्टिपथमेका भक्तमण्डल्यागता। सर्वे भक्ता: प्रभुसङ्कीर्त्तने तथा लग्ना: सन्ति, यत्तै: देवर्षेरागमनमपि न ज्ञातम्। रुदन् नारदस्तेभ्य: प्रभुव्यथां कथयति । एको भक्तो वदित–''यदि मे स्वामी पीडितस्तदा मम जीवनं किमर्थम्?'' स छुरिकया स्वहृदयं विदारयति। रुधिरेण कमण्डलुं पूरयित्वा च नारदाय कथयति–''मुनिवर! शीघ्रं गच्छ। तावदहमपि प्रभुसेवायामागच्छामि।''

सफलप्रयत्नो नारद: शीघ्रमेव क्षीरसागरं गच्छति। तत्र हरि: प्रसन्नमुखो लक्ष्म्या सह संलापे तत्परोऽस्ति। नारदं दृष्ट्वा प्रभु: कथयति–"वत्स! त्वं विलम्बेनाऽऽगत:। अधुनाऽहं स्वस्थोऽस्मि। तिष्ठ, कथय, कुतो लब्धमिदं रुधिरम्?''

**नारद:**– "भगवन्! सद्भक्तानामिदानीम् अत्यन्ताऽभावोऽस्ति। केनापि मम वचनेषु विश्वासो न कृत:। तैर्ममापि बहुधोपहास: कृत:। धन्योऽस्ति एको महात्मा येन श्रुत्वैव रक्तं प्रस्तुतम्। तस्य त्याग: सदैव प्रशंसनीयो भविष्यति। पुनश्च मम मनसि एका जिज्ञासाऽस्ति। "तस्य तिलकरामपण्डितस्य भाग्यपरिवर्तनं कथं जातम् ?"

**भगवान् विष्णु:** – "अनेन रक्तप्रसङ्गेनापि भवता न ज्ञातम्? असौ रक्तदाता महात्मा स एवास्ति, येन तिलकरामस्य भाग्यपरिवर्तनं कृतम्। यो व्यक्तिर्ममपीडां श्रुत्वैव स्वप्राणानपि त्यजति, तस्य कथनं मिथ्या कर्तुं क: समर्थ: ?"

भो देवर्षे! हृदयं तु त्वमपि धारयसि, तस्मिन् रुधिरमपि चास्ति। असि च त्वमपि मे प्रियभक्त:। त्वयैव स्वरुधिरं कथं न दत्तम् ?" देवर्षिर्भगवत: पादयो: पतति। क्षमा याचते, कथयति च–

**रमानाथ: स्वभक्तस्य भक्तिभावेन हर्षित: ।**
**रक्षार्थं तस्य मानस्य स्वन्यायमपि दूयते ॥**

# क्रीड़ाया महत्त्वम्

कस्याऽपि विषयस्य महत्त्वप्रतिपादनात् पूर्वं तस्य का उपयोगिता भवति एतस्य प्रदर्शनम् मन्मते तदपेक्षया अधिकमावश्यकम्। क्रीडा- कर्मणि लब्धपाटवानां शरीरम् अपूर्वं स्फूर्तिमयं भवति। येन ते तया स्फूतिमत्तया विलक्षणया शक्त्या च सर्वा आपदो निस्तरन्ति, एषा सर्वप्रथमा उपयोगिता। क्रीडायाः साहचर्येण ते किं किं न साधयन्ति इति अपरा उपयोगिता। अस्तु तावत् कस्मै अपि क्रीडानुरञ्जितचेतसे यत् क्रीडायाः क्रीडानां वा महत्त्वं तथाविधमेवाऽस्ति यथा नृपाय स्वकीयमुकुटस्य महत्त्वं भवति। चक्रवर्ती यत्सुं राज्यशासने लभते तदेव सुं क्रीडार्थी क्रीडायाम्। बाल्यावस्था प्रथमं क्रीडनाय पश्चाद् अन्यकार्याय भवति, बालका अपि मातापित्रोः, भातृभगिन्योः, मित्र-बान्धवानां कृते क्रीडनकरूपा एव भवन्ति सुविदितमेव सर्वेषाम्।

व्यायामः सर्वेषां सर्वाङ्गानि पोषयति किन्तु सर्वे तत्कर्तुं नेच्छन्ति, आरभ्य च सम्यङ् निर्वाहं न कुर्वन्ति एतादृग् व्यतिक्रमेण लाभस्या-पेक्षया हानिरेव जायते। केवलं वयस्का एव तं नियमतः कर्तुं पार-यन्ति, अतः बाल्यावस्थायाः सर्वोत्तमा व्यायामाः पादकन्दुकक्रीडा-यष्टिकन्दुकक्रीडाप्रभृतयः अनेकाः सन्ति यत्र बालकाः प्रेरणां विनाऽपि स्वकीयेन औत्सुक्येन प्रवृत्ता भवन्ति ततः क्षुत्पिपासादिकं विस्मृ त्याऽपि निरन्तरमनुरज्यन्ते। अनया प्रवृत्त्या तेषा मानसिक शारीरिकः च विकासः स्वयमेव भवति। समीचीनया क्रीडया तेषां व्यायामस्याऽपि पूर्तिः हेलया एव भवति। यदि बालकाः क्रीडया आत्मविकास प्रति जागरूका न भवेयुस्तर्हि ते राष्ट्राय भारस्वरूपाः सम्भविष्यन्ति । क्रीडया देहे यल्लाघवम् आयाति तदन्येन प्रयत्नेन कथमपि नैव शक्यते। इदमेव लाधवं स्वास्थ्यसम्पादने हेतुतां भजते । क्रीडार्थिनः स्मयमाना मुाकृतिः, तेजोमयं नेत्रयुगलं, भ्राजमानं भालपट्टं, सुगठितं शरीरं, स्वाभाविकेन रक्तसश्वरणेन सत्स्वास्थ्यं च जनानां चेतः आनन्दयति। अतः यः क्रीडातो विद्वेषं करोति स आत्महन्ता, नास्तिकः अधार्मिकश्च अस्ति इति वयम् अनुभवामः ।

क्रीडया बालानां मनः दुराचारविमुं भूत्वा सदाचारपथे प्रवृत्तिं लभते। क्रीडार्थिनां मानसे दुराचारभावनाः नोत्पद्यन्ते। यतः अध्य- यनस्य समये ते तत्र प्रवृत्ताः भवन्ति, प्रातः सायं नित्यक्रियासु, समये क्रीडन्ति ततः श्रान्ताः सन्तः रात्रौ सुेन स्वपन्ति । इत्थं चतुर्वि- शतिहोरात्मकं कालं ते शोचादिकर्मणि भोजने पठने क्रीडने शयने एव व्यतीतं कुर्वन्ति। क्व तेषामवसरो दुराचरणस्य। अतः क्रीडार्थी चरित्रवान् भवति इति जनाः कथयन्ति तंत्र विश्वसन्ति च। तस्मिन् अपूर्वा सहनशक्तिः,नीतिप्रियता, सङ्घटनशक्तिः, परोपकारिता, दयालुता, कष्टसहिष्णुताप्रभृतयः लोकोत्तराः गुणाः स्वभावत एव प्रादुर्भवन्ति, इत्थं सः सद्गुणगणमण्डितः क्रीडाकुशलः उत्तमो देशसेवकः जननेता च भवति ।

क्रीडाभिः मानवस्य हृदि अपूर्वः साहसः वीरतायाः भावश्च उदेति। यदा उभयपक्षीयाः क्रीडार्थिनः परपक्षं जेतुं प्रयतन्ते तदा दार्श- नार्थिनः अपि अपूर्वोल्लासमयेन भावेन करतलध्वनिभिः गगनमपि गुञ्जायमानं विदधति। येन क्रीडकाः अपि द्विगुणेनोत्साहेन तत्र प्रवर्तन्ते। तदा कोऽपि विचलितः स्यात् उत्पतेद् निपतेद् वा तदनु ते सर्वे सम्भूय तस्य साहाय्यमपि प्राथमिकचिकित्सया सद्यः कुर्वन्ति। इयमपरा विशेषता तेषु दृष्टिपथं याति तद् विजेतृपक्षीयाः कदापि पराजितपक्षीयान् नावमन्य न च उपहसन्ति एव, केवलं ते विजयोल्लासेन स्वात्मनि उत्साहानुभवं कुर्वन्ति।

एवम्प्रकारेण निरन्तरं ये विजयिनो भवन्ति ते देशान्तरेषु च आहूयन्ते, तत्र ते धनं यशः च अर्जयन्ति। तेषु मित्राणि शत्रवश्च सममेव स्निह्यन्ति। अतएव लेकस्येयं सूक्तिः पुरस्क्रियते-

**स्वास्थ्यलाभसमृद्ध्यर्थं मनसस्तोषणाय च ।**
**कुर्वन्तु बालकाः सर्वे क्रीडां खेलाञ्च कूर्दनम्॥**

## स्मरणार्थम्

वसुदेवसुतं देवं कंसचाणूरमर्दनम् ।
देवकीपरमानंदं कृष्णं वन्दे जगद्‌गुरुम् ॥

### श्री ( लक्ष्मी )

| विभक्ति | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | श्री | श्रियौ | श्रियः |
| द्वितीया | श्रियम् | श्रियौ | श्रियः |
| तृतीया | श्रिया | श्रीभ्याम् | श्रीभिः |
| चतुर्थी | श्रियै, श्रिये | श्रीभ्याम् | श्रीभ्यः |
| पञ्चमी | श्रियाः, श्रियः | श्रीभ्याम् | श्रीभ्यः |
| षष्ठी | श्रियाः, श्रियः | श्रियोः | श्रीभ्याम्,श्रीणाम् |
| सप्तमी | श्रियाम्, श्रियि | श्रियोः | श्रीषुः |
| सम्बोधनम् | हे श्रीः ! | हे श्रियोः! | हे श्रियो! |

### भू ( भूमि )

| विभक्ति | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | भूः | भूवौ | भुवः |
| द्वितीया | भुवम् | भुवौ | भुवः |
| तृतीया | भुवा | भूभ्याम् | भूभिः |
| चतुर्थी | भुवः, भुवै | भूभ्याम् | भूभ्यः |
| पञ्चमी | भुवः, भुवाः | भूभ्याम् | भूभ्यः |
| षष्ठी | भुवः, भुवाः | भुवोः | भूनाम्, भुवाम् |
| सप्तमी | भुवि, भुवाम् | भुवोः | भूषु |
| सम्बोधनम् | हे भूः! | हे भुवो! | हे भुवः! |

### द्यौ ( अन्तरिक्ष )

| विभक्ति | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | द्यौः | द्यावौ | द्यावाः |
| द्वितीया | द्यावम् | द्यावौ | द्यावः |
| तृतीया | द्यावा | द्यौभ्याम् | द्यौभिः |
| चतुर्थी | द्यावे | द्यौभ्याम् | द्यौभ्यः |
| पञ्चमी | द्यावः | द्यौभ्याम् | द्यौभ्यः |

| | | | |
|---|---|---|---|
| **षष्ठी** | द्याव: | द्यावो: | द्यावाम् |
| **सप्तमी** | द्याव: | द्यावो: | द्यावाम् |
| **सम्बोधनम्** | हे द्यौ:! | हे द्यावौ! | हे द्याव:! |

## गच्छत् ( जाता हुआ ) ( will going )

| **विभक्ति** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमा** | गच्छन् | गच्छन्तौ | गच्छन्त: |
| **द्वितीया** | गच्छन्तम् | गच्छन्तौ | गच्छत: |
| **तृतीया** | गच्छता | गच्छद्भ्याम् | गच्छद्भि: |
| **चतुर्थी** | गच्छते | गच्छद्भ्याम् | गच्छद्भ्य: |
| **पञ्चमी** | गच्छत: | गच्छद्भ्याम् | गच्छद्भ्य: |
| **षष्ठी** | गच्छत: | गच्छतो: | गच्छताम् |
| **सप्तमी** | गच्छति | गच्छतो: | गच्छत्सु |
| **सम्बोधनम्** | हे गन्छन्! | हे गच्छन्तौ! | हे गच्छन्त:! |

## धातुरूपम्
## याच् माँगना

### ( लट् लकार )

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुष-** | याचति | याचत: | याचन्ति |
| **मध्यमपरुष-** | याचसि | याचथ: | याचथ |
| **उत्तमपुरुष-** | याचामि | याचाव: | याचाम: |

### ( लोट् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष-** | याचत्,याचतात् | याचताम् | याचन्तु |
| **मध्यमपरुष-** | याच | याचतम् | याचत |
| **उत्तमपुरुष-** | याचानि | याचाव | याचाम |

### ( विधिलिङ् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष-** | याचेत् | याचेताम् | याचेयु: |
| **मध्यमपरुष-** | याचे: | याचेतम् | याचेत |
| **उत्तमपुरुष-** | याचेयम् | याचेव | याचेम |

### ( लङ् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष-** | अयाचत् | अयाचताम् | अयाचन् |
| **मध्यमपरुष-** | अयाच: | अयाचतम् | अयाचत |
| **उत्तमपुरुष-** | अयाचम् | अयाचाव | अयाचाम |

( लृट् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष**– | याचिष्यति | याचिष्यत: | याचिष्यन्ति |
| **मध्यमपरुष**– | याचिष्यसि | याचिष्यथ: | याचिष्यथ |
| **उत्तमपुरुष**– | याचिष्यामि | याचिष्याव: | याचिष्याम: |

## आत्मनेपदी

### याच् ( To beg ) माँगना

( लट् लकार )

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमपुरुष**– | याचते | याचेते | याचन्ते |
| **मध्यमपरुष**– | याचसे | याचेथे | याचध्वे |
| **उत्तमपुरुष**– | याचे | याचावहे | याचामहे |

( लोट् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष**– | याचताम् | याचेताम् | याचन्ताम् |
| **मध्यमपरुष**– | याचस्व | याचेथाम् | याचध्वम् |
| **उत्तमपुरुष**– | याचै | याचावहे | याचामहै |

( विधिलिङ् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष**– | याचेत | याचेयाताम् | याचेरन् |
| **मध्यमपरुष**– | याचेथा: | याचेयाथाम् | याचेध्वम् |
| **उत्तमपुरुष**– | याचेय | याचेवहि | याचेमहि |

( लङ् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष**– | अयाचत | अयाचेताम् | अयाचन्त |
| **मध्यमपरुष**– | अयाचथा: | अयाचेथाम् | अयाचध्वम् |
| **उत्तमपुरुष**– | अयाचे | अयाचावहि | अयाचामहि |

( लृट् लकार )

| | | | |
|---|---|---|---|
| **प्रथमपुरुष**– | याचिष्यते | याचिष्येते | याचिष्यन्ते |
| **मध्यमपरुष**– | याचिष्यसे | याचिष्येथे | याचिष्यध्वे |
| **उत्तमपुरुष**– | याचिष्ये | याचिष्यावहे | याचिष्यामहे |

## व्यावहारि- संस्कृत-प्रश्नोत्तर

१. किं क्रियते?
अध्ययनं क्रियते।

२. किम् अध्ययनं क्रियते?
संस्कृतपठनं क्रियते।

३. अत्र किं क्रियते?
अत्र पूजा क्रियते।

४. तत्र किं क्रियते?
तत्र भजनं क्रियते।

५. सर्वत्र किं क्रियते?
सर्वत्र कार्यं क्रियते।

६. किं कार्य क्रियते?
कार्यालयकार्यं क्रियते।

७. अन्यत् किं क्रियते?
अन्यत् खेलनं क्रियते।

८. किं ेलनं क्रियते?
क्रिकेटेलनं क्रियते।

९. क्रिकेटेलनं कदा क्रियते?
क्रिकेटेलनं सायंकाले क्रियते।

१०. प्रातः काले किं क्रियते?
प्रातःकाले भ्रमणं क्रियते।

११. प्रातःकाले भ्रमणं कुत्र क्रियते?
भ्रमणं समुद्र तटे क्रियते।

१२. प्रातःकाले जागरणं कदा क्रियते?
प्रातःकाले जागरणं सूर्योदयपूर्वं क्रियते।

१३. सूर्योदयपश्चात् किं क्रियते?
सूर्योदयपश्चात् गृहकार्यं क्रियते।

१४. तत्पश्चात् किं क्रियते?
तत्पश्चात् दुग्धपानं क्रियते।

१५. तत्पश्चात् किं क्रियते?
दुग्धपानस्य पश्चात् विद्यालयगमनं क्रियते।

१६. विद्यालये किं करणीयम्
अध्ययनं करणीयम्।

१७. किम् अध्ययनं करणीयम्?
संस्कृतस्य अध्ययनं करणीयम्।

१८. मध्याह्ने किं करणीयम्?
मध्याहने भोजनं करणीयम्।

१९. अपराह्णे किं करणीयम्?
अपराहणे खेलनं करणीयम्।

२०. पूर्वाहणे किं करणीयम्?
पूर्वाहणे जलपानं करणीयम्।

२१. रात्रिसमये किं करणीयम्?
रात्रिसमये शयनं करणीयम् ।

२२. अध्ययनं कदा करणीयम्?
अध्ययनं प्रातः काले करणीयम्।

२३. प्रातःकाले दशवादने किं करणीयम्?
प्रातः काले दशवादने गानं करणीयम्।

२४. सायंकाल सप्तवादने किं करणीयम्?
सायंकाले सप्तवादने नाटकं करणीयम्।

२५. सार्द्धनव वादने
किं करणीयम्? भोजनं करणीयम्।

२६. सपादनववादने
किं करणीयम्? गमनं करणीयम्।

२७. पादोननववादने
किं करणीयम्? नृत्यं करणीयम्।

२८. प्रथममिलने किं कथनीयम्?
प्रथम मिलने सुप्रभातम् कथनीयम्।

२९. अतिथिजनाय कि करणीयम्?
अतिथिजनाय सुस्वागतं कथनीयम् ।

सुरुचिपूर्ण मासिक बाल संस्कृत पत्रिका

# "संस्कृत-चन्द्रिका"

नैतिक-मूल्यों के साथ-साथ

सम्पूर्ण देश के बाल-साहित्यकारों तथा नवोदित प्रतिभाओं

की लेखनी की संयुक्त प्रस्तुति

# "संस्कृत-चन्द्रिका"

( आई.एस.एस.एन.-2347–1565 )

संस्कृत भाषा के प्रचार-प्रसार हेतु प्रयत्नशील दिल्ली संस्कृत अकादमी, दिल्ली सरकार द्वारा सरल संस्कृत-भाषा में प्रकाशित एक ऐसी सुरुचिपूर्ण एवं ज्ञान-विज्ञान तथा नैतिक शिक्षा की बाल- मासिक पत्रिका जो प्रत्येक वर्ग के पाठक-समुदाय की अपेक्षा के

**मूल्यः- एक प्रति रु.२५/- मात्र, वार्षिक सदस्यता शुल्क रु. २५०/- मात्र**

सुरुचि सम्पन्न स्वस्थ सकारात्मक अभिव्यक्ति की संवाहिका

# "संस्कृत-चन्द्रिका"

के स्थायी अध्येता बनें।

आज ही अपना वार्षिक सदस्यता शुक्ल नगद, मनिआर्डर अथवा दिल्ली में भुनाये जाने योग्य बैंक ड्राफ्ट दिल्ली संस्कृत अकादमी के नाम से भिजवाकर सदस्यता प्राप्त करें। शुल्क मल्टी सिटी चैक द्वारा भी स्वीकार्य होगा।

पत्र व्यवहार का पता --

**सचिव/ सम्पादक, दिल्ली संस्कृत अकादमी, दिल्ली सरकार**

**प्लाट सं.-५ झण्डेवालान, करोलबाग, नई दिल्ली-११०००५**

**दूरभाष सं.- ०११-२३६३५५९२, २०९२०३६३**

RNI No.
DELSAN/2002/8921

प्रकाशक एवं मुद्रक सचिव, दिल्ली संस्कृत अकादमी
के स्वामित्व में अकादमी के कार्यालय प्लाट सं.-५,
झण्डेवालान, करोलबाग, नई दिल्ली-११०००५
से प्रकाशित